CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-M

Research Series - No. 2

ŚIVĀGAMĀDIMĀHĀTMYASAṂGRAHAḤ

by

Śālivāṭī Jñānaprakāśa



Swami Dayananda Satabhishekam Memorial Digital Library & Research Centre

(Under the auspices of Sruti Seva Trust)

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

ŚIVĀGAMĀDIMĀHĀTMYASAṂGRAHA

by

Śālivāṭī Jñānaprakāśa

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

Published by :
Swami Dayananda Satabhishekam Memorial Digital Library & Research Centre
Old No. 3, New No.5, Subramania Gurukkal St (Gurukkal Colony)
R.A. Puram, Mandaveli, Chennai - 600 028.
Phone & Fax : 044 - 42804400 Mobile : 76671 08041, 94449 71104
e-mail : sdsdlibrary@gmail.com

© Swami Dayananda Saraswati

All Rights Reserved.

First Edition : July 2011 Copies : 500

Printed by :
Shri Harish Printers,
Mandaveli, Chennai - 600 028.
Cell : 98407 22009
E-mail : harishprinter@gmail.com

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MoE

ॐ

समर्पणम्



Sruti Seva Trust

Swami Dayananda Satabhishekam Memorial Digital Library & Research Centre

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

SWAMI DAYANANDA SARASWATI

22nd July, 2011

The Sruti Seva Trust is pleased to announce that it has founded a digital library of ancient manuscripts with more than two hundred thousand pages and many of them are never published. With a panel of scholars, the trust is planning to bring out the unpublished manuscripts of some value, whose topics cover different disciplines like Saiva Agama, Vaikhanasa Agama, Pancharatra, Tantra, Vedanta, Srauta Sutras with commentaries and Stotras.

The library is committed to explore and make digital copies of manuscripts as well as of old books lying in public and private libraries, besides the ones at different homes facing the danger of being eaten by white ants or destroyed by fire and so on. We are happy to release a few of our first publications from our Agama manuscripts namely Jirnoddharadasaka, Snapanavali & Sivagamadimahatmyam and also a book on Vedanta called Advaita Vedanta Sara Sangraha.

We thank all the scholars and others who helped us in this seva at the altar of Bharatiya Heritage.

Swami Dayananda Saraswati

Arsha Vidya Gurukulam, Anaikatti (P O), Coimbatore 641 108 INDIA Tel : +91 422 265 7001 / 265 7007
Swamu Dayananda Ashram, Purani Jhari, Rishikesh 249 201 INDIA Tel : +91 135 243 0769 / 243 6769
Arsha Vidya Gurukulam, P O Box 1059, Saylorsburg, PA 18353 USA Tel : +1 570 992 2339 E-mail : sakshat49@gmail.com

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

Foreword

A great śaiva ācārya by name Jñānaprakāśa who lived in the holy town of Śālivāṭi in Jaffna had brought out a compilation called *Śivāgamādimāhātmyasaṃgraha*. In this text the learned author has discussed the important topics such as the equal validity of the Veda-s and the Śaivāgama-s, the greatness of śaivadīkṣā and the ādiśaiva-s, worshipping Śiva at home well as in temples, worshipping the devotees of Śiva, qualifications of people belonging to the four varṇa-s in taking the vow of saṃnyāsa and other matters as the various types of Liṅga-s for worship. To substantiate his views Jñānaprakāśa has brought in lots of passages from such Āgama texts as the Kāmikāgama, Pauṣkarāgama, the Purāṇa-s like the Skānda, Sūtasaṃhitā, Kāśīkhaṇḍa and the sthalapurāṇa-s such as the Hālāsyamāhātmya, Kāñcīpurāṇa, etc.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

I do believe that all the points discussed in this text will be of great utility for all spiritually-inclined persons.

Having noted that this text has not so far been published, Mr. T. Ganesan, Researcher in Śaivasiddhānta, French Institute, Pondicherry has prepared a critical edition of this text based on many manuscripts. He deserves all felicitations for this important task.

I sincerely pray to the Almighty God for His divine blessings on T. Ganesan so that more such texts of importance remaining in manuscripts be also critically edited on the basis of manuscripts in future and see the light of the day.

'Sāhityaśiromaṇi'

'Āgamapravīṇa'

V.Chandrasekharasivacharya

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

அணிந்துரை

யாழ்ப்பாணத்திலுள்ள சாலிவாடிபுரம் என்ற ஊரில் வாழ்ந்துவந்த ஞானப்பிரகாசகுரு என்னும் சைவ ஆசாரியர் சிவாகமமாஹாத்மியஸங்கிரஹம் என்னும் பெயருள்ள இத்தொகுப்பு நூலை இயற்றியுள்ளார்கள்.

அந்நூலில் சைவசமயத்தின் சிறப்பு, வேதம் சிவாகமம், ஆதிசைவர்கள், சிவதீக்ஷை ஆகியவற்றின் மேன்மை, ஆன்மார்த்த பரார்த்த பூஜை, வைதிகபூஜை, சிவனடியார்களை வணங்கி உபசரித்தல், சாதுர்வர்ண்ய ஸந்நியாஸவிதி, சாதுர்வர்ண்ய ஆசாரியத்துவம், சிவலிங்கபேதங்கள் இது போன்ற பல சிறப்பான விஷயங்களைக் காமிகம், முதலான சிவாகமங்களிலும், ஸ்காந்தம் முதலான புராணங்களிலும், காசீகண்டம், ஹாலாஸ்ய மாஹாத்மியம், காஞ்சீபுராணம் முதலான தலபுராணங்களிலும் கூறப்படும் பிரமாண வசனங்களைத் தொகுத்து வழங்கியுள்ளார்கள்.

இந்நூலில் கூறப்பட்டுள்ள அனைத்து விஷயங்களும் ஆன்மீகத்தில் பற்றுள்ள எல்லா மக்களுக்கும் மிகவும் பயனுள்ளதாக இருக்கும் என நினைக்கிறேன். பழமையான ஓலைச்சுவடியில் உள்ள இந்த நூல் இதுவரை வெளிவராததை அறிந்த பாண்டிச்சேரியிலுள்ள சைவசித்தாந்த ஆராய்ச்சியாளர் முனைவர் T. கணேசன் என்பவர் ஓலைச்சுவடியிலிருந்து அச்சுப் பிரதியாகச்

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

செய்திருப்பது மிகவும் பாராட்டப்படவேண்டிய விஷயமாகும்.

மேலும் இதுபோன்ற ஓலைச்சுவடிகளிலுள்ள சிவாகமநூல்களைக் கண்டெடுத்து அச்சுப்பிரதி யாக்குவதற்கு எல்லாம் வல்ல இறைவன் அருள் புரிய வேண்டுமென்று இறைவனை வணங்கிப் பிரார்த்திக்கிறேன்.

இப்படிக்கு
ஸாஹித்யசிரோமணி
ஆகமப்ரவீணர்

V.சந்திரசேகரசிவாசாரியார்

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

INTRODUCTION

Śivāgamādimāhātmyasaṃgraha, as the name indicates, is a compilation of passages from the Purāṇa-s and the Śaivāgama-s with a view to prove and establish the validity of the Śaivāgama-s. Along with that the author, Jñānaprakāśa, adds his own explanatory comments. The author is a resident of the holy town *Tirunelveli (Salivati)* in Jaffna, SriLanka who lived between the later part of the 16th century and the beginning part of 17th century. This text is so far unpublished. It consists of 5 divisions:

1. Śivadīkṣāmāhātmyam
2. Śivabhaktamāhātmyam
3. Śaivācāryamāhātmyam
4. Cāturvarṇyaśaivamāhātmyam
5. Cāturvarṇyasaṃnyāsavidhi

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

Jñānaprakāśa begins the text by stating the views of opponents of the Āgama. According to them, while the Veda-s are fully valid since they have not been taught by a human being at a particular time, the Āgama-s are not so. Jñānaprakāśa refutes this view by citing from the *Pauṣkarāgama* which states that all the scriptures existed in the form of subtle sound (nāda) in Śiva, the supreme cause who taught the four Veda-s by His four faces and taught the Śaivāgama-s through His fifth one. Further, as clearly stated in the *Vāyusaṃhitā* and the *Sūtasaṃhitā,* the eighteen knowledge-sources (aṣṭādaśavidyāsthāna)--comprising the four Veda-s, the six auxiliaries (aṅga) such as the śikṣā, vyākaraṇa, etc., the vedic exegetics (mīmāṃsā, logic (nyāya), the holy legends (puraṇa), the entire corpus of laws and personal conduct (dharmaśāstra), the science of medicine (āyurveda), the science of warfare

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

(dhanur-veda), the books of music (gāndharvaveda) and the science of economics and commerce (arthaśāstra)—were all taught at the beginning by Śiva. Moreover, at the beginning of each creation of the world, Śiva teaches the eighteen purāṇa-s to Vyāsa, the son of Satyavatī, who in his turn teaches them in each Dvāparayuga of each aeon (*kalpa*). In the same way, Śiva the supreme God, teaches the twenty eight Śaivā-gama-s beginning from *Kāmika,* at the commencement of each creation of the world. Therefore, both the Veda-s and the Śaivāgama-s have validity only because they have been revealed by Śiva, the supreme benefactor (paramāpta). Jñānaprakāśa adduces the syllogistic argument: The Veda-s and the Śaivāgama-s were brought out by Śiva and are composed of letters and sentences just as the poetic works of Kālidāsa and others. The crux of the argument is that the Veda-s are valid

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

because they were revealed by Śiva and not due to the belief that they are of superhuman origin or that they were uncreated as held by the mīmāṃsaka-s. This has been clearly explained by the *Sūtasaṃhitā*. In fact this is the basic view accepted by most of the śaiva ācārya-s. Not only so but this view was first propounded in the ealiest śaiva scripture, *Śvetāśva-taropaniṣad*. We read in its penultimate verse so unequivocally:

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।

तँ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।

This has been correctly pointed out by Nīlakaṇṭhadīkṣita, one of the greatest śaiva stalwarts of the 17th century in one of his great works, *Śivatattva-rahasya* which is a detailed commentary on the *Śivāṣṭottaraśatanāmastotra* that forms part of the *Śaṃkarasaṃhitā* of the *Skandapurāṇa*. Nīlakaṇṭhadīkṣita ably argues

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MoE

for the validity of all the purāṇa-s setting aside the baseless claim of some of the vaiṣṇava-s according to whom those purāṇa-s that extol Śiva as the highest god are to be considered as tāmasic in their content as they have been given out by Brahmā in one of the kalpa-s when he was under the spell of tamoguṇa.

The Āgama-s of the Śaivasiddhānta school are also revealed by Śiva, independent of the Veda-s; they do not contradict the Veda-s and are equally valid as attested by many texts such as the *Vāyavīyasaṃhitā* of the *Śivamahāpurāṇa*, the *Kāmikāgama*, the *Makuṭāgama*, etc. Jñānaprakāśa interprets the expression 'vedasāra' occurring in these Āgama-s as that the Śaivāgama-s expound those subject which are not explained in the Veda-s and elaborate those that are

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

mentioned briefly in the Veda-s[1]. Jñānaprakāśa cites the well known *Kāmikāgama* passage

लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ।

अतिमार्गं च मन्त्राख्यं तन्त्रमेकमनेकधा ॥

Which divides the entire scriptural corpus into five broad categories by classifying the Śaivāgama-s as the 'mantra' system. Jñānaprakāśa in his remark observes, on the authority of *Rauravavṛttiviveka*, a lost work of Rāmakaṇṭha,[2] and the *Pauṣkarāgama*, that all the scriptures of the different systems are valid within their own limited conceptions and

---

[1] Śrīkumāra, in his commentary Tātparyadīpikā on the Tattvaprakāśa (verse, 5) of King Bhoja, argues elaborately in similar fashion for proving the validity of the Śaivāgama-s.

[2] Rāmakaṇṭha is one of the greatest śaivasiddhānta ācārya-s that lived in Kashmir in the 9th century who had composed some of the very important commentaries on the Mataṅgapārameśvarāgama, Kiraṇāgama as well as on the Nareśvaraparīkṣā of Sadyojyoti, who preceded him and had composed many independent texts for the systematization of the Śaivasiddhānta philosophical doctrines.

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

putting them all in a hierarchical and ascending order of merit and validity, the Śaivasiddhānta is the highest and supreme one as the fruit it offers in the form *mokṣa* is the highest conception. The Śaivāgama-s should be completely distinguished from those tantra-s which enjoin unvedic and abhorring practices and are therefore not valid.

In the second chapter Jñānaprakaśa discusses the greatness and the unique importance of the *dīkṣā* as expounded in the Śaivāgamas. Citing a large number of Śaivāgama passages Jñānaprakāśa firmly establishes the fundamental importance of *śivadīkṣā;* without proper *dīkṣā* no study of the Āgama-s or practice of śaiva rituals is possible. Only by undergoing the *dīkṣā* under a competent ācārya which is of many types and done according to the level of *śaktipāta* (fall of grace of Śiva on the person), a person becomes eligible to study and

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

to practice śaiva rituals and eventually attain *mokṣa*. Jñānaprakāśa also cites the sthalapurāṇa-s such as the Vṛddhācalamāhātmya, Hālāsyamāhātmya which clearly state that the Liṅga-s in those holy places --Vṛddhācala and Madurai—were installed fully according to the Śaivāgama-s.

In the chapter on the greatness of Śivabhakta-s, Jñāna-prakāśa refers to Rāmakaṇṭha, who, in his commentary on the Ḳiraṇāgama, states that all persons--brāhmaṇa, kṣatriya, vaiśya, śūdra and even mleccha-s are eligible for getting the *śaivadīkṣā* and have equal rights in learning and practising the Śaivāgama-s. Jñānaprakāśa cites passages from the *Śivadharmottara* according which Liṅga is of two types: the immovable (*sthāvara*) that has been installed and the mobile (*jaṅgama*) which is nothing but the initiated śaiva (*dīkṣita*). Further, the passage states that any disrespect done to the *jaṅgama*—

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

the mobile Liṅga--is tantamount to desecrating the immovable Liṅga and therefore no worship done to it will be of any benefit. Jñānaprakaśa cites an interesting passage from one text *Jñanalakṣaṇasamuccaya* (probably now lost) which clearly states that by undergoing the *śaivadīkṣā* which involves the ritual act of the person being born from the womb of Vāgīśvarī, the divine Mother, with appropriate rituals and whose Father is Śiva, the Vyomavyāpī, the person losses his earlier *varṇa*, say śūdra, etc. and thereby becomes the son of Śiva (*śivaputra*).

In the next chapter on the greatness of *ādiśaiva*, Jñānaprakāsa cites passages form the *Kāmikāgama*, etc. according to which the sages such as Kauśika, Kāśyapa, Atri, Agastya, etc. are of two kinds: those with the *śivasṛṣṭi* and those without it. The first type of such sages have all been initiated by the five faces of Śiva.

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

Those Brahmins who are born in the lineage of these sages are called *śivadvija* and *sāntānika* and are known as Ādiśaiva-s. According to the *Suprabhedā-gama*, *Kāmikāgama*, etc. those Ādiśaiva-s with *śivadīkṣā* are fully eligible for doing the public worship in the temples. For them there is no such sin of *devalaka* which is worshipping in a temple for the sake of livelihood. What is more, the *Vīratantra* states that an Ādiśaiva can perform public worship even for his livelihood and he will not be tinged with the *devalakatva* sin. For, it is his own duty (svadharma). While all initiated persons are eligible to do personal worship, only an Ādiśaiva can do the public worship. The same view is corroborated by the *Kāmikāgama* also. The *Suprabhedāgama* clearly states that the *Bodhāyana-gṛhyasūtra* is to be followed by the Ādiśaiva-s for those rites which are not fully explained in the *Caryāpāda*

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

of the Śaivāgama-s. According to the *Yogajāgama* the *Deśika, Sādhaka* are synonymously used to denote Ādiśaiva, and since they were śaiva-s from the beginning (since earliest times ?) they are called Ādiśaiva-s. As they have been given *dīkṣā* by Śiva Himself they are called *Śivabrāhmaṇa*-s. Since they are *ācārya*-s for all they are *Deśika*; as they perform the installation of the Liṅga in a temple they are called *Sthāpaka*. The *Makuṭāgama* calls them *ūrdhvaśaiva*. Jñānaprakāśa cites also passages from the *Ajitāgama, Hālāsyamāhātmya,* etc. which state that Brahmin-s with *dīkṣā* are eligible to do worship in temple. He interprets them saying that *śivapūjā* is of two kinds: *vaidikī* and *śaivī*. In the former kind, the *Bodhāyanasūtra* is followed for all rites in the temple while the Śaivāgama-s are followed in the second one. Jñāna-prakāśa even says that on any account an uninitiated

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

person (*adīkṣita*) is absolutely not eligible to perform worship in temple.

In the final chapter Jñānaprakāśa discusses the qualifications of a preceptor belonging to the four varṇa-s. As expounded in the *Sarvajñānottarāgama*, *Cintyāviśva* and such other texts all persons born in the four varṇa-s and the six varṇa-s of the anuloma type and initiated according to śaivāgama-s are theoretically eligible to be ācārya-s.

The text is concluded by passages that explain the eligibility of persons belonging to the four varṇa-s for taking saṃnyāsa, duties of the three types of śaiva monks and the type of Liṅga that a person born in different varṇa-s is eligible to worship daily.

Thus the *Śivāgamādimāhātmyasaṃgraha* boldly discusses some of the basic views of the *Śaivasiddhānta* system and comes out with a clear statement of the solutions fully basing

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

itself on the Śaivāgama corpus with a full support from the Purāṇa-s and the Sthalamāhātmya-s.

It is highly gratifying and apt that such a text which is very much relevant to the present conditions is published now. There exist more such original and valuable texts mostly in manuscripts which call for immediate attention of scholars to be edited, studied and published.

I offer my humble pranams to Pujyasri Svami Dayananda of the Arsha Vidya Gurukulam on this occasion and I am ever grateful to him for taking this valuable text for publication.

Dakṣiṇāyanapuṇyakāla T. Ganesan
July 17, 2011 Pondicherry

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

The critical edition is based on the following 4 manuscripts:-

अ T. 1059: This is a paper transcript in Devanagari belonging to the French Institute of Pondicherry. It has been copied from a palm-leaf manuscript belonging to G. Swaminatha Gurukkal, Tiruvadudurai.

आ T. 281 This is a paper transcript in Devanagari belonging to the French Institute of Pondicherry. It has been copied from a palm-leaf manuscript RE 43643 of the French Institute of Pondicherry. This manuscript also contains texts such as the *Śaivāgamaparibhāṣā-mañjarī, Śivadharmottara, Āśaucadīpikā* and *Vātula-śuddhākhya*.

इ T. 372 This is a paper transcript in Devanagari belonging to the French Institute of Pondicherry. It has been copied from a palm-leaf manuscript. It contains the text of the

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

Dīkṣādarśa which is another voluminous compilation on the single subject of *Dīkṣā* by Nigamajñānadeśika of the 16th century.

उ RE 10772 This palm-leaf manuscript belonging to the French Institute of Pondicherry contains also the *Tantrāvatāra-paṭala* of the *Makuṭāgama*, *Vanapratiṣṭhāvidhi*, *Nāgapratiṣṭhāvidhi*, *Taṭākapratiṣṭhāvidhi*, *Aśvatthapratiṣṭhāvidhi*, *Svīkāradattahoma*, *Ṣaṣṭy-abdapūrtiśānti* (*Śaunakīya*) and *Khagaśānti*.

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

Dīkṣādarśa which is another voluminous compilation on the single subject of *Dīkṣā* by Nigamajñānadeśika of the 16th century.

5. RE 10772 This palm-leaf manuscript belonging to the French Institute of Pondicherry contains also the *Tantrāvatāra-paṭala* of the *Makuṭāgama*, *Vanapratiṣṭhāvidhi*, *Nāgapratiṣṭhāvidhi*, *Taṭākapratiṣṭhāvidhi*, *Aśvatthapratiṣṭhāvidhi*, *Sūryārādhana*, *Ṣaṣṭyabdapūrtiśānti* (*Saṃskṛta*) and *Kūrmaśānti*.

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवागमादिमाहात्म्यसंग्रहः

शालिवाटिपुरनिवासिज्ञानप्रकाशगुरुविरचितः

[१]नमः शिवाय शक्त्यै च बिन्दवे शाश्वताय च ।
गुरवे च गणेशाय कार्त्तिकेयाय धीमते ।

केचिन्निरीश्वरवादिनां मतमवलम्ब्य[२] श्रुतीनाम्[३] अकृतकत्वेन प्रामाण्यं

---

[१] ई, उ मातृकयोः "नमः शिवाय शक्त्यै . . . यत्तत् सर्वमवदत् प्रभुः" पर्यन्तं भागो न दृश्यते । परं तत्स्थाने इमे श्लोका वाक्यानि च दृश्यन्ते ।-

यद्यत् शिवप्रणीतं वाक्यं तत्सर्वं प्रमाणम् । आगमस्यापि शिवप्रणीतत्वादेव प्रामाण्यम् । तदुक्तं श्रीमत्पौष्करे-पक्षपातविनिर्मुक्तो यथार्थग्राहकः शिवः ।
अव्ययः परिपूर्णश्च स्तन्त्रः पशुपाशहा ।
प्रमाणमेकं तद्वाक्यं तथ्यं श्रेयोनिधिः सदा । इति । वायव्यसंहितायामपि-
यद्यथावस्थितं वस्तु गुणदोषैः स्वभावतः ।
यावत्फलं च पुण्यं च सर्वज्ञस्तथा वदेत् ।
रागाज्ञानादिभिर्दोषैः ग्रस्तत्वादनृतं वदेत् ।
ते चेश्वरे न विद्यन्ते ब्रूयात् स कथमन्यथा ।
अजाताशेषदोषेण सर्वज्ञेन शिवेन यत् ।
प्रणीतममलं काक्यं तत् प्रमाणं न संशयः । इति ।

[२] अवलम्ब्य] अ, इ; अखिलमस्य –आ;

[३] श्रुतीनाम्] आ, इ ; स्मृतीनाम् -अ;

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवागमानां कृतकत्वेन[१] प्रामाण्यं नास्ति। यदस्त्यपि[२] कथंचित् प्रामाण्यं तथापि श्रुतिपथगलितानां मानुषाणामिति दुर्बुद्धयो वदन्ति । तन्न ।

पञ्चवक्त्रधरो भूत्वा पञ्चभिस्तैर्मुखैरपि।

वेदादिग्रन्थजालं यत्तत् सर्वमवदत् प्रभुः ।

अदृष्टविग्रहाच्छान्तात् शिवात् परमकारणात् ।

नादरूपं विनिष्क्रान्तं शास्त्रं सर्वमिति[३] स्थितम्[४] । इति पौष्करशिवागमश्रुतेश्च।

पुनः -

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।

आयुर्वेदो धनुर्वेदो गान्धर्वं चेत्यनुक्रमात् ।

अर्थशास्त्रं[५] परं तस्मात् विद्या ह्यष्टादश स्मृताः।

अष्टादशानां विद्यानामेतसां भिन्नवर्त्मनाम् ।

आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः।

---

[१] कृतकत्वेन] अ, इ; कृतत्वेन-आ

[२] यदस्त्यपि] अ; . . . . पि-आ

[३] शास्त्रं सर्वमिति] इ ; . . . . सर्वमिति-अ; शास्त्रं शार्वमिति-आ

[४] स्थितम्] अ, इ; श्रुतम्-आ

[५] अर्थशास्त्रं] अ, आ; अस्त्रशास्त्रं-इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अष्टादश पुराणानि कथितानि समासतः।
तेषां सर्गान्तरेष्वेव द्वापरे दर्शको[१] मुनिः।
व्यासो यथा महादेवः कामिकादिप्रकाशकः।
अष्टादशपुराणानां कर्ता सत्यवतीसुतः।
कामिकादिप्रभेदस्य यथा देवो महेश्वरः।

इति वायव्यसंहिताधर्मसंहितासूतसंहिताश्रुतिभिश्च यथा कामिकादीनां[२] शिवेनैद प्रणयनात्[३] । प्रामाण्ये यथापि नारायणा-वतारेण[४] व्यासेन प्रणयनात् प्रामाण्येऽपि असाववशिष्ट[५] इति सूतसंहिताप्रतिवचनाच्च। वेदानां शिवागमानां च परमाप्तपरशिव-कृतकत्वेनैव[६] प्रामाण्यं नाकृतकत्वेन[७] कालिदासादिवाक्यवद् वर्णपद-वाक्यरचनावत्वात् । सत्कार्यतया वेदा नित्या इति चेच्छिवागमाश्च तथा इत्यभिव्यक्त्यनभिव्यक्तकर्तृकत्वम्[८]। नासतो विद्यते भावो नाभावो विद्यते

---

[१] दर्शको] अ,इ; दशको-आ

[२] कामिकादीनामागमसंहितानां] आ,उ; कामिकादीनां-अ, इ

[३] शिवेनैव प्रणयनात्] अ, इ; शिवप्रणयनात्-आ;

[४] यथापि नारायणावतारेण] अ, इ; यथा . . . . रेण-आ

[५] असाववशिष्ट] अ, इ, उ; असावविशिष्ट-आ

[६] °कृतकत्वेनैव] अ, इ; °कृतत्वेनैव-आ

[७] नाकृतकत्वेन] अ, इ,उ; नाकृतत्वेन-आ;

[८] तथेत्यभिव्यक्त्यनभिव्यक्तकर्तृकत्वं] उ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

सत[1] इति वचनात्[2] । तथेत्यभिव्यक्तिकर्तृत्वं[3] शिवस्य सिद्धमित्यकृतकत्वं वाऽस्तु[4] ।

तदुक्तं सूतसंहितायाम्-

वेदोऽनादिः शिवस्तस्य व्यञ्जकः परमार्थतः।

अभिव्यक्तिमपेक्ष्यैव प्रणीतेत्युच्यते बुधैः। इति ।

तथा सहस्रनामव्याख्यायां कृतागमायेत्यत्र कृताः प्रणीता आगमाः कारणकामिकाद्यास्तन्त्रविशेषा येन सः कृतागमः । तथा चोक्तम् - कामिकाद्या वातुलान्ताः शिवेनोक्ताः शिवागमा इत्यलङ्कारदीक्षितेन व्याख्यातम्। ततः शिवकृतकत्वेनैव[5] उभयोः प्रामाण्यम्। तदुक्तं चतुर्वेदार्थतात्पर्यसंग्रहे-

वेदाः प्रमाणमिति संगिरमाण एव

दिव्यं तवागममवैति जनः प्रमाणम् ।

त्वद्ध्यानवाक्यविषयौपयिकैः पदार्थै-

रामूर्धमाकलितविग्रहमा च मूलात् ॥

कल्पाः प्रमाणमृषिभिर्यदि नः प्रणीताः

---

[1] वाक्यमिदं उ मातृकायां न विद्यते ।

[2] वचनात्] अ, आ; सूतसंहितावृत्तिवचनात्-इ

[3] तथेत्यभिव्यक्तिकर्तृत्वं] अ; तथेत्यभिव्यक्त्यनभिव्यक्तिकर्तृत्वं-आ; तथेत्यभिव्यक्तिकर्तृत्वं . . . प्रणीतेत्युच्यते बुधैः इति पर्यन्तं इ मातृकायां न विद्यते।

[4] वाऽस्तु] अ; अपास्तम् –आ, उ

[5] शिवकृतकत्वेनैव] अ, इ; शिवकृतत्वेनैव-आ; वाक्यमिदं उ मातृकायां नास्ति ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

किं न प्रमाणमृषिणा महता महर्षे ।

शक्यं न वक्तुमपरिग्रहदूषितानि

तन्त्रान्तराणि भवता शिव कर्तुमन्ति ॥ इति।

वायव्यसंहितायां च-

अजाताशेषदोषेण सर्वज्ञेन शिवेन यत् ।

प्रणीतममलं वाक्यं तत् प्रमाणं न संशयः ॥

तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता।

यथार्थं पुण्यपापेषु[१] तदश्रद्धो व्रजत्यधः[२]॥ इति।

[३]ततः परस्परं वेदानाम् इव परस्परोपबृंहणत्वमन्तरा स्वतन्त्रत्वेन एवोभयेषां प्रामाण्यम्। तदुक्तं मतङ्गे-

प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम्। इति ।

पौष्करेऽपि-

प्रमाणमेकं तद्वाक्यं तथ्यं श्रेयोनिधिः सदा । इति।

तथा व्याख्यातं सूतसंहितायां विद्यारण्यस्वामिभिरपि ।

शिवपूजाप्रक्रमे-

वैदिकी तान्त्रिकी चेति द्विजेन्द्रास्तान्त्रिकी तु सा ।

---

[१] यथार्थपुण्यपापेषु- मुद्रितः पाठः (वायुसंहिता, उत्तरभागः, १२: २५उ०)।

[२] पुण्यपापेषु तदश्रद्धो व्रजत्यधः] अ, इ, उ; पुण्यपापेर्वङ्ग . . . . -आ

[३] ततः इत्यारभ्य सदा इति पर्यन्तं भागः 'उ' मातृकायां न विद्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

तान्त्रिकस्यैव नान्यस्य वैदिकी वैदिकस्य हि ।[१] इति ।

अत्र[२] वेदतन्मूलस्मृतिपुराणादिप्रतिपादितप्रकारा वैदिकी। तदनपेक्ष-शिवप्रोक्तकामिकाद्यागमप्रतिपादितप्रकारा तान्त्रिकी। तत्र तान्त्रिक्या अधिकारिविशेषमाह- तान्त्रिकस्यैवेति । तत्रोदितकुण्डमण्डलादि-पुरःसरदीक्षादिसंस्कृतस्यैवेत्यर्थ इति[३]। तथा हि[४] न हि परस्परं वेदानामिव[५] स्वतन्त्रप्रवृत्तशिवागमानां[६] वेदबाह्यत्वम् । वेदसारम्[७] इदं तन्त्रमिति वेदोत्कृष्टवेदविशेषत्वस्य समुक्तत्वात्[८]। तदुक्तं शैव-पुराणसम्भववायव्यसंहितायां[९]-

भगवञ्छ्रोतुमिच्छामि शिवेन परिभाषितम्।
वेदसारं शिवज्ञानं संश्रितानां[१०] विमुक्तये । इति।

---

[१] वैदिकी वैदिकस्य हि] अ, इ, उ; नैव वैदिकसंहतिः-आ

[२] अत्र] अ, आ, इ; तत्र-उ

[३] °संस्कृतस्यैवेत्यर्थ इति] अ, इ; °संस्कृतस्यैव न तद्रहितस्यैवेत्यर्थम् इति-आ,उ

[४] तथा हि] अ, इ; तथापि - आ, उ

[५] परस्परं वेदानामिव] अ, इ, उ; परस्पर . . . . नामिव-आ

[६] स्वतन्त्रप्रवृत्तशिवागमानां] आ, इ,उ ; स्वतन्त्रप्रयुक्तशिवागमानां-अ

[७] वेदसारम्] अ, इ; वेदानुसारम्-आ

[८] वेदोत्कृष्टवेदविशेषत्वस्य समुक्तत्वात्] अ, इ, उ; वेदोत्कृष्टवेदविशेषत्वस्य सरक्तत्वात्-आ

[९] शैवपुराणसम्भववायव्यसंहितायां] अ, इ; शैवपुराणभव°-आ

[१०] संश्रितानां] उ ; संश्रुतां-अ; सश्रितानां-आ; संश्रुताधिमुक्तये-इ; स्वाश्रितानां-मुद्रितवायुसंहितापाठः ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

मकुटे च-

वेदसारमिदं तन्त्रं तस्माद्वैदिक आचरेत् ।

वेदान्तार्थमयं ज्ञानं सिद्धान्तं परमं शुभम् ।

ऊर्ध्वस्त्रोतोद्भवं श्रेष्ठमष्टाविंशतितन्त्रकम् ।

वेदसारार्थदं ज्ञेयम् अन्यत्त्वन्यार्थसाधनमिति ।

सुप्रभेदे-

शैवं पाशुपतं सोमं लाकुलं च चतुर्विधम् ।

तेषु शैवं परं सौम्यं रौद्रं पाशुपतादिकम् ।

कामिकाद्यष्टाविंशच्च[१] तन्त्रं शैवमिति स्मृतम् ।

तदेव सौम्यमाख्यातं सिद्धान्तं हि तदेव तु ।

तदन्यद्रौद्रमाख्यातं तन्त्रं पाशुपतादिकम् । इति ।

कामिके च-

सिद्धान्तं वेदसारत्वादन्यद्वेदबहिष्कृतम् ।

सिद्धान्ते विहिताचारो वैदिकाचार उच्यते ।

कर्तव्यं चेदनुष्ठेयं शैवकर्माविरोधि यत् ।

विरुद्धं चेत् परित्याज्यं न तु शैवं परित्यजेत् ।

संग्राह्यं वैदिकं सर्वं शैववाक्याविरोधि यत् ।

शैवं वैदिकमेवोक्तं वैदिकं शैवमेव च ।

वैदिकान्तर्बहिर्भूतं शैवं शैवात् तदप्यथ[१] ।

---

[१] कामिकाद्यष्टाविंशच्च] अ, इ,उ; कामिकाद्यष्टाविंशतिश्च-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

तथापि वैदिकाच्छ्रेष्ठं शैवं तस्मात् परं न हि ।

सिद्धान्तं कामिकादि स्यात् नास्मात् परमनुत्तमम् ।

शैवं तु मूलभूतं स्यात् चतुर्वेदास्तदुद्भवाः।

तथापि वैदिकं वेदसारमित्यादिवाक्यतः ।

शैवं प्रोक्तं च सर्वत्र तदर्थैक्यान्मुनीश्वराः । इति ।

ननु वेदसारं श्रौतमस्वतन्त्रं[२] तन्त्रमन्यत्। पुनर्वेदसारमश्रौतं कामिकादिकं स्वतन्त्रं तन्त्रमन्यत्[३]। तदुक्तं वायव्यसंहितायाम् -

शैवागमोऽपि द्विविधः श्रौतोऽश्रौतश्च[४] संस्मृतः।

श्रुतिसारमयः श्रौतः स्वतन्त्र इतरो मतः।

स्वतन्त्रो दशधा पूर्वं तथाष्टदशधा पुनः।

कामिकादिसमाख्याभिः सिद्धः सिद्धान्तसंज्ञितः।

श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः।

परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यते। इति ।

तदेवं स्थिते कथं कामिकादिकं वेदसारमिति मकुटादिषूक्तम्[५]। सत्यम् । श्रौतत्वापादकं वेदसारत्वं द्विप्रकारम्। तत्र प्रथमं

---

[१] तदप्यथ] आ; तदप्यधः-अ, इ; तदप्यथा-उ

[२] श्रौतमस्वतन्त्रं] अ, इ; श्रुतं स्वतन्त्रं-आ; अस्वतन्त्रतन्त्रं-उ

[३] स्वतन्त्रं तन्त्रमन्यत्] अ, इ; स्वतन्त्रमन्यत्-आ; स्वतन्त्रतन्त्रमन्यत्-उ

[४] श्रौतोऽश्रौतश्च] आ, इ ; श्रौताश्रौतश्च-अ।

[५] मकुटादिषूक्तम्] अ; मकुटोक्तम्-आ ; वाक्यमिदं उ मातृकायां न विद्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शैवपाशुपतप्रतीततन्त्रवैदिकपाशुपतप्रमेयप्रविस्तारकशतकोटि-प्रविस्तरे[१] कस्मिंश्चिदद्ययावदप्रसिद्धं[२] स्वतन्त्रं तत्र दृष्टं[३] वेदसारत्वं वेदानुसारित्वम्। द्वितीयं सिद्धान्तप्रमेयप्रविस्तारकपदार्थादि-प्रविस्तरे[४] स्वतन्त्रतन्त्रे कामिकादिके दृष्टम्। वेदसारत्वं तु न हि दध्यादेर्नवनीतादिवद्वेदादुत्पन्नत्वं वेदानुसारित्वं वेदव्याप्यत्वं वा । अन्यद्वा[५] किंचिद्[६] उक्तमपि। वेदानुसारित्वं[७] वेदार्थस्वीकारत्वम् इत्यर्थः। तत्त्वेन[८] वेदव्यापकत्वात् । तदुक्तं वायव्यसंहितायाम् -

यदुक्तमन्यशास्त्रेषु विद्यते तच्छिवागमे।
न दृष्टं यच्छिज्ञाने तदन्यत्र न विद्यते । इति।

कामिके च -

---

[१] शैवपाशुपतप्रतीततन्त्रवैदिकपाशुपतप्रमेयप्रविस्तारकशतकोटिप्रविस्तरे] अ, इ; शैवपाशुपतप्रतितन्त्र-वैदिकपाशुपतमेयप्रविस्तारकशतकोटिप्रविस्तरे-आ ; शैवपाशुपतप्रतितन्त्राष्टकवैदिकपाशुपत-प्रमेयप्रविस्तारकशतकोटिप्रविस्तारे-उ

[२] अद्ययावदप्रसिद्धं] आ, उ ; अद्ययावदष्टसिद्धा-अ, इ।

[३] स्वतन्त्रं तत्र दृष्टं] अ, इ; स्वतन्त्रतन्त्रे वा दृष्टं-आ ; स्वतन्त्रतन्त्रदृष्टं-उ

[४] सिद्धान्तप्रमेयप्रविस्तारकपरार्धादिप्रविस्तरे] आ, उ; सिद्धान्तप्रमेयप्रविस्तारकपदार्थादिप्रविस्तरे-अ, इ

[५] अन्यद्वा] आ,उ ; अन्यच्च-अ, इ

[६] किंचिद्] अ, इ; क्वचिद्-आ,उ

[७] वेदानुसारित्वं] अ, इ; वेदानुसारत्वं-आ,उ

[८] वेदार्थस्वीकारत्वमित्यर्थः तत्त्वेन] अ, इ; वेदार्थसंकाशत्वमित्यर्थत्वेन-आ; वेदार्थस्वीकारत्वमित्यर्थत्वेन-उ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सिद्धान्तात् परमं ज्ञानं नेति शास्त्रस्य निश्चयः।
अन्यशास्त्रेषु ये मुक्ताः सिद्धान्ते पशवः स्मृताः ।
अष्टाविंशतितन्त्राणि सिद्धान्तमिति कीर्तितम् । इति।

चिन्त्यविश्वे च -

शैवं परात्परं[१] ज्ञेयं सर्वतत्त्वैकनायकम् ।
सर्वमन्त्रमयं ज्ञेयं सर्वदेवमयं भवेत् ।
जन्मान्तरतपोभिश्च सन्मार्गज्ञानसम्भवम् । इति।

अरुणाचलमाहात्म्ये च -

नास्ति शोणाद्रितः क्षेत्रं नास्ति पञ्चाक्षरान्मनुः।
नास्ति माहेश्वराद्धर्मो नास्ति शास्त्रं शिवागमात् । इति।

किन्तु प्रमाणविरोधस्य स्वतःप्रमेयविरोधमूलत्वात्। परस्परं वेदानामिव कथञ्चित् क्वचित् किंचिदेकात्मवादादिप्रमेयप्रदेश-प्रतिपादनप्रकारविरोधमात्रपरित्यागेन वेदविहितविधिनिषेधकत्व-वैधुर्येण[२] बहुशोऽर्थैक्यादविरोधवेदाचारवेदार्थस्वीकारेण शैववेद-विशारदानिति सुप्रभेदश्रुतेः[३] स्वातन्त्र्येण वेदाधिगतानधिगतार्थ-

---

[१] परात्परं] अचिन्त्यविश्वसादाख्यागमः हस्तलिखितकागदकोशः फ्रेञ्च् इन्स्टिट्यूट् पुदुच्चेरि संस्थास्थः ; पाशुपतं-अ; परपदं-आ, इ, उ

[२] वेदविहितविधिनिषेधकत्ववैधुर्येण] अ, इ,उ; °निषेधकत्वविधाय . . . . र्येण-आ

[३] सुप्रभेदे श्रुतेः] इ,उ ; सुप्रभेदकृते-अ; सुप्रभेद . . . . ते-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

गन्तृत्वलक्षणवेदजनकवेदविशेषशिवागमनां शिववेदत्वमेव वेद-सारत्वमिति पर्यवसितार्थः मनुष्यजनकमनुष्यत्वविशेषब्राह्मणत्ववत्।

तदुक्तं मोक्षकारिकासु -

पाशदृष्टिविरोधाय प्रवृत्तमपि मानताम्।
न जहाति यतश्छेद्याः पाशास्तस्येह सर्वतः।
न च स्वगोचरे तासां बाधते तत्प्रमाणताम् ।
तासु वर्णाश्रमाचारानभ्यनुज्ञातवच्च तत् ।
न चान्येन प्रमाणेन संरुद्धस्तस्य गोचरः । इति।
पशोरपि च कर्तव्यं पत्युः प्रेरणपूर्वकमिति च ।

मोहशूरोत्तरे च -

पुराणं बाध्यते[१] वेदैरागमैश्च तदुक्तयः।
सामान्यं च विशेषं च शैवं वैशिष्टिकं वचः[२]। इति।

वृद्धाचलमाहात्म्ये च -

एतास्तु मूर्तीः परमेश्वरस्य वृद्धाचलेशालयमण्डपेषु ।
स्थानेषु संस्थाप्य चकार पूजां शिवागमप्रोक्तविशेषमार्गैः ॥ इति[३]।

---

[१] बाध्यते] इ, उ ; साध्यते-अ, आ

[२] वैशिष्टिकं वचः] अ, इ; वैशिष्टमेव च-आ

[३] चकार पूजां शिवागमप्रोक्तविशेषमार्गैः इति] अ, इ, उ; इदमर्धं 'आ' मातृकायां न विद्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

पुनरत्रायं विवेकः-- बहुधा वेदविरुद्धार्थप्रतिपादकत्वमेव वेदबाह्यत्वं न सर्वधा। तथात्वे वेदबाह्यशास्त्रदुर्लभं स्यात् । तत्र परस्परं वेदानामिव वेदविशेषशिवागमानामपि कथंचिद्वेदविरुद्धार्थप्रतिपादकत्वमस्त्यपि न वेदबाह्यत्वम् । शिवशास्त्रेतरचार्वाकादिसर्व-शास्त्राणामपि यथाकथंचिद्विरुद्धार्थप्रतिपादकत्वम् अस्तीति न सर्वधा बाह्यानीति यथानुरूपं प्रमाणानि सफलान्येव। तदुक्तं शिवागमे गुरुकृतौ च -

चार्वाका भूतसंसिद्धाः स्मार्तास्तन्मात्रसंहतौ।
वैशेषिकास्त्वहंकारे मानसाश्चेन्द्रिया अपि।
बुद्धितत्त्वे स्थिता बौद्धास्तत्तर्के[१] न्यायवादिनः ।
आर्हतास्तु गुणे तत्त्वे प्रकृतौ पाञ्चरात्रकाः[२]।
वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे स्थिताः।
शैवाः पौराणिका[३] रागे सोमा[४] विद्यापदे स्थिताः।
कापालास्तु कलानिष्ठाः काले कालेश्वराः स्थिताः।
नियतीशाः कलान्तस्थाः पृथक् तस्मान्न चोदिताः।
पाशुपतास्तु मायायां विद्यायां तु महाव्रताः।

---

[१] तत्तर्के] आ यद्यप्ययं पाठः न समीचीनतरः पाठान्तराभावात् सोऽत्र स्वीकृतः । ; ततत्वे-अ, इ, उ

[२] पाञ्चरात्रिकाः] आ ; पाञ्चरात्रकाः-अ, इ

[३] शैवाः पौराणिका] आ; शैवपौराणिका-अ, इ

[४] सोमा] अ, इ; सौमा-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

प्रवाहेश्वरकास्त्वीशे प्रयोज्यकर्तृका अपि ।

ये सदाशिवतत्त्वस्थाः ते शैवाः समवादिनः[१] ।

शक्तौ शाक्ताः शिवे शैवाः सामान्यास्ते स्मृता बुधैः ।

सिद्धान्ती शिवसायुज्यसिद्धिमानुपरिस्थितः ॥ [२] इति ।

तदिदमेव शिवसायुज्यमपि ईदृगुक्तम्[३] –

नात्मछेदोऽपवर्गो[४] न च पशुशिवयोरैक्यमत्रापवर्गः ।

नाविद्याग्रासहानिर्न च गुणविलयो नापि पाषाणमुक्तिः ।

*यद्बोधानन्दरूपं त्रिमलविगमने व्यक्तमात्मस्वरूपं

तत् सायुज्येन वाच्यं शिवसदृशवपुः शैवतन्त्रेऽपवर्गः ॥ इति ।

---

[१] ते शैवाः समवादिनः] आ ; शिवसम्बन्धवादिनः-अ, इ

[२] उल्लेखितेषु अमीषु श्लोकेषु उभयोः मातृकयोः श्लोकानां व्यत्यासः वैषम्यं च विद्यते। अत्र केवलं 'आ' मातृकाधृतश्लोकाः यथादृष्टा लिख्यन्ते-

शैवपौराणिकागारे सोमा विद्या पदे स्थिताः ।

कापालास्तु कलानिष्ठाः काले कालेश्वराः स्थिताः ।

नियतशः कलान्तःस्थाः पृथक् तस्मान्न चोदिताः ।

पाशुपतास्तु मायायां विद्यायां तु महाव्रताः ।

प्रवाहेश्वरकास्त्वंशे प्रयोज्य कर्तृका अपि ।

ये सदाशिवतत्त्वस्थास्ते शैवाः समवादिनः ।

शाक्ताः शिवे शैवाः सामान्यास्ते स्मृता बुधैः ।

सिद्धान्ती शिवसायुज्यसिद्धिमानुपरि स्थितम् ।

[३] द्रागुक्तम् । आ; ईदृगुक्तम्-अ, इ।

[४] नात्मच्छेदोऽपवर्गो] आ, इ ; नाम्नश्छेदोऽपवर्गो-अ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

ततः साक्षान्महिमत्वेन[१] श्रुतिसिद्धशिवकृतकत्वेनैव[२] शिवशास्त्रस्य सामान्यार्षसूत्रशास्त्रादेरुत्कृष्टत्वं[३] चानुक्त्वा सिद्धम् । तस्मात् सूतसंहितादिके-

अधः स्रोतोद्भवाद्धर्मादूर्ध्वस्रोतोद्भवः परः ।
ऊर्ध्वस्रोतोद्भवाद्धर्मात् स्मार्तधर्मो महत्तरः ।
स्मार्तेभ्यः श्रौतधर्माश्च वरिष्ठा मुनिसत्तमाः । इति ।

क्वचिदर्थमन्यथोक्तमपि तदुक्तिः अमलशिवमहावाक्येन[४] बाध्यते । शिवागमस्य वेदादुत्कृष्टत्वमीशानमुखादुत्पत्तिश्रुतेः ।

तदुक्तं श्रीमद्धालास्यमाहात्म्ये-

शिवज्ञानानि दिव्यानि कामिकादीनि भूसुराः ।
श्रीमद्धालास्यनाथस्य सम्भवन्त्यूर्ध्ववक्त्रतः ।
पुनः स देवदेवस्य पुरुषाख्येन वक्त्रतः ।
एकविंशतिभेदेन युक्तमृग्वेदमब्रवीत् ।
यजुर्वेदं चैकशतभेदयुक्तमघोरतः ।
सहस्रभेदसहितं सामवेदं तु वामतः ।
अथर्वं नवधा भक्तं सद्योजातेन चाब्रवीत् । इति ।

---

[१] साक्षान्महिमत्वेन] इ ; साक्षान्महर्षित्वेन-अ, आ

[२] श्रुतिसिद्धशिवकृतकत्वेनैव] अ, इ; श्रुतिसिद्धशिवकृतत्वेनैव-आ

[३] सामान्यार्षसूत्रशास्त्रादेरुत्कृष्टत्वं] अ, इ; सामान्यमपि सूत्रशास्त्रादेरुत्कृष्टत्वं-आ

[४] अमलशिवमहावाक्येन] अ, इ; आर्थत्वादमलशिवमहर्षिवाक्येन-आ

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MoE

श्रीकामिके च-

ईशानवक्त्रादूर्ध्वस्थाज्ज्ञानं यत् कामिकादिकम् ।

ऋग्यजुस्सामाथर्वाश्च पुरुषाद्याननोद्भवाः ।

तथैव मन्त्रतन्त्राख्यं सदाशिवमुखोद्गतम् ।

सिद्धान्तं गारुडं वामं भूततन्त्रं च भैरवम् ।

ऊर्ध्वपूर्वकुबेराप्ययाम्यवक्त्राद्यथाक्रमम् । इति ।

तस्मादाप्तपरमाप्तोभयाप्तप्रणीतानां चार्वाकादिशैवसिद्धान्तानां सर्वेषां शास्त्राणां प्रत्यक्षादिप्रमाणानामिव यथानुरूपमधिगतानधिगतार्थ-गन्तृत्वेन बाध्यबाधकसामान्यविशेषव्याप्यव्यापकतटस्थलक्षण-स्वरूपसाध्यसाधकसावधिनिरवधिप्रामाण्यं सिद्धम् । न हि स्वस्वमतमेकैकं प्रमाणम् । तथा स्वीकारे

सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा ।

अथोभावपि सर्वज्ञौ मतिभेदस्तयोः कथम् ।

इति निर्वक्तुमशक्यत्वात् सर्वाणि शास्त्राणि अप्रमाणानि स्युरित्यनिष्टं जगदान्ध्यमापतेत् । ततः सर्वाणि शास्त्राणि स्वस्वावधि-प्रमाणान्येव। तथा साधितं श्रीरामकण्ठशिवाचार्येण रौरववृत्ति-विवेके।

तदुक्तं च पौष्करे-

अन्योऽपि मार्गो वेदादिः पशुपाशार्थदर्शकः ।

स्वोक्ततत्त्वावधिव्याप्तिर्ब्रह्मविष्ण्वादिकर्तृकः ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

परत्वात्[१] मोक्षमार्गस्य स्थितस्वर्गादिभोगदः ।

न चार्षं पौरुषैर्वाक्यै ऋषिभिर्दैविकं तथा ।

न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मना ।

तथा रौद्रं न हरिणा न रुद्रेण शिवात्मकम् ।

बाध्यमूर्ध्वोर्ध्ववैशिष्यादधोऽधो बाध्यमूर्ध्वतः ।

शिवागमाविरोधेन शास्त्रं सर्वं व्यवस्थितम् ।

नान्यशास्त्राविरोधेन तत्संवादतयाथवा ।

शिवशास्त्रं व्यवस्थाप्यं तद्व्यवस्थापकं यतः ।

यस्य यस्य हि शास्त्रस्य यावती व्याप्तिरिष्यते ।

तावत्येव भवेद्विप्राः प्रामाण्यं तस्य तस्य च । इति ।

सूतगीतायाम्[२] अपि सूचितं –

तन्त्रोक्तेन प्रकारेण देवता या प्रतिष्ठिता ।

सा सुवन्द्या सुसेव्या च वन्दनीया च वैदिकैः ।

राजा तु वैदिकान् सर्वान् तान्त्रिकानखिलानपि ।

असङ्कीर्णतया नित्यं स्थापयेन्मतिमत्तमः ।

अन्नपानादिभिर्वस्त्रैः सर्वान् राजाभिरक्षयेत् । इति ।

ननु पूर्वं वेदादिकं सर्वं शास्त्रं शिवकर्तृकमित्युक्तम् इदानीमन्योऽपि मार्गो वेदादिः ब्रह्मविष्णुकर्तृक इति ब्रह्मविष्ण्वादिकर्तृकमित्युक्तम् । महान्

---

[१] परत्वात्] अ; परस्मात्-आ; महान्विवरत्वात्-इ

[२] सूतगीतायाम्] अ, इ; सूतसंहितायाम्-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

विरोधः। सत्यम् । वेदादिकं सर्वं शास्त्रं शिवशास्त्रं च महामायायां नादात्मना प्रथमं शिवकृतं[१] वर्णपदवाक्यरचनात्मना पुनः साधिकरणनिरधिकरणशिवकृतमिति न कोऽपि विरोधः ।

तदुक्तं श्रीमत्कामिके-

लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ।
अतिमार्गं च मन्त्राख्यं[२] तन्त्रमेकमनेकधा ।
सिद्धान्तं मन्त्रतन्त्रं स्यादतिमार्गं ततो वरम् ।
अध्यात्मं यत्ततो नीचं तस्माद्वैदिकमेव च ।
वैदिकाल्लौकिकं हीनं ब्रह्माद्याः[३] पञ्च देवताः ।
सद्योवाममहाघोरपुरुषेशानमूर्तयः ।
प्रत्येकं पञ्चवक्त्राः स्युस्तैरुक्तं लौकिकादिकम् ।
सद्यमन्त्राद्विनिष्क्रान्तो ब्रह्मनामा[४]ऽखिलार्थदृक् ।
तेन वै[५] लौकिकं शास्त्रं मर्त्यलोकेऽवतारितम् ।
शब्दशास्त्रमलङ्कारं निरुक्तं छन्द एव च ।[६]

---

[१] शिवकृतं] आ ; शिववक्त्रतः-अ, इ

[२] मन्त्राख्यं] अ, इ; मन्त्रान्तं-आ

[३] ब्रह्माद्याः] आ, इ ; बाह्याद्याः-अ

[४] ब्रह्मनामा] आ ; ब्रह्मानामा-अ, इ

[५] तेन वै] अ, इ; तेनैव-आ

[६] इतः परं

कौटिल्यं भरतं ज्योतिःशास्त्रं वात्स्यायनादिकम् ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

लोकायतं तथा साङ्ख्यमार्हतो मतमेव च ।
मीमांसा दण्डनीतिश्च वार्ताद्यं लौकिकं मतम् ।
वाममन्त्राधिपो विष्णुः कारणेशो द्वितीयकः ।
तेन वैदिकमुद्दिष्टम् अष्टादशपुराणकम् ।
धर्मशास्त्रं च वेदान्तं पाञ्चरात्रं च बौद्धकम् ।
रुद्रो घोराद्विनिष्क्रान्तस्त्वध्यात्मं च प्रणीतवान् ।[१]
ईश्वरः पुरुषाज्जातस्त्वतिमार्गं प्रणीतवान् ।
पञ्चार्थं लाकुलं चान्यत्तथा पाशुपतं मतम् ।
सदाशिवोऽपि भगवान् मन्त्रतन्त्रमपालयत् ।
उक्तानि प्रतिषिद्धानि पुनः सम्भाषितानि च ।
सापेक्षनिरपेक्षाणि शिववाक्यान्यनेकधा ।
ऊर्ध्वस्रोतोद्भवं सर्वमनन्तादीनबोधयत् ।
तेनोक्तं परमेशेन श्रीकण्ठाय महात्मने ।
आदावभूद्विधा ज्ञानमधिकारविभेदतः ।
परापरेण[२] भेदेन पतिपाशात्मदर्शकम् ।

आयुःशास्त्रं धनुःशास्त्रं वृक्षायुर्वेद एव च । इति 'आ' 'इ' मातृकयोः श्लोक एक अधिकतया दृश्यते ।

[१] न्यायवैशेषिकं सांख्यं सेश्वरं च प्रणीतवान् । इतयेकमर्धं 'आ' 'इ' मातृकयोरधिकतया विद्यते ।

[२] परापरेण] अ; परावरेण-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम् ।
वेदाद्यपरविज्ञानं पशुपाशार्थदर्शकम् ।
यथा विलक्षणं चक्षुः क्षपायां नृबिडालयोः ।
तथा विलक्षणं ज्ञानमेवमेतत् परापरम् ।
ज्योतिर्ज्ञानरतं वेदपुराणाहितचेतसा ।
तत्सिद्धपुरुषार्थेषु कृतयत्नं परित्यजेत् ।
कामिकादिशिवज्ञानं वेदार्थज्ञानमेव च ।
समं यो मन्यते मोहात्तं प्रयत्नेन वर्जयेत् ।[१] इति ।

*पुनस्तत्रैव-

गारुडं भूततन्त्रं च भैरवं वामतन्त्रकम् ।
कापालं पाञ्चरात्रं च लाकुलं कुलशास्त्रकम् ।
[१]इतिहासं षडङ्गं च ऋग्यजुस्सामसंज्ञकम् ।

---

[१] कामिकादिशिवज्ञानं वेदार्थज्ञानमेव च ।
समं यो मन्यते मोहात्तं प्रयत्नेन वर्जयेत् । – अ, इ;
ऊर्ध्वस्रोतोद्भवाच्छास्त्रादपरं तन्मिखक्रमात् ।
कामिकादिशिवज्ञानं मूर्धा भगवतः सदा ।
इतराणि महेशस्य हृत्कण्ठाद्यङ्कानि वै ।
पूर्वपक्षतया तानि कथितानीह शम्भुना ।
हेयोपादेयवस्तूनां निर्णये परमार्थतः ।
तत्सर्वमधरीकृत्य शिवसिद्धान्त ईरितः । इति 'आ' मातृकायां तत्स्थाने विद्यते ।

* इदं श्लोकद्वयं 'आ' मातृकायां न दृश्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अथर्वणं तथा बौद्धमार्हतो मतमेव च ।*

ऊर्ध्वस्रोतोद्भवाच्छास्त्रादपरं तदनुक्रमात् ।

कामिकादिशिवज्ञानं मूर्धा भगवतः सदा ।

इतराणि महेशस्य हृत्कण्ठाद्यङ्गकानि वै ।

पूर्वपक्षतया तानि कथितानीह शम्भुना ।

हेयोपदेयवस्तूनां निर्णये परमार्थतः ।

तत्सर्वमधरीकृत्य शिवसिद्धान्त ईरितः । इति ।

तथा महाभारते च वेदादेः साधिकरणशिवकृतकत्वमुक्तम् ।

युगान्तेऽन्तर्हितान् वेदान् इतिहासान् महर्षयः ।

लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा । इति ।

वायव्यसंहितायां च –

आम्नायसिद्धमखिलं धर्ममाश्रमिणामिह ।

ब्रह्मणा कल्पितं पूर्वं ममैवाज्ञापुरस्सरम् ।

स तु पैतामहो धर्मो बहुवित्तक्रियान्वितः ।

नात्यन्तफलभूयिष्ठः क्लेशायाससमन्वितः ।

तेन धर्मेण महता श्रद्धां प्राप्य सुदुर्लभाम् ।

वर्णिनो ये प्रपद्यन्ते मामनन्यसमाश्रयाः ।

तेषां सुखेन मार्गेण धर्मकामार्थमुक्तये ।

---

[1] तन्त्रं पाशुपतं चान्यत् पुराणं धर्मशास्त्रकम् । इतीदमर्धं 'इ' मातृकायामधिकतया दृश्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

वर्णाश्रमसमाचारो मया भूयः प्रकल्पितः ।

तस्मिन् भक्तिमतामेव मदीयानां तु वर्णिनाम्[१] ।

अधिकारो न चान्येषामित्याज्ञा नैष्ठिकी मम । इति ।

अतः[२] श्रुतिपथगलितानां मानुषाणां तु तन्त्रमित्युक्तं तन्त्रं न शिवागमः । तथा कृते शिवादधीतशिवतन्त्राणां सनकादीनां श्वेतोपमन्यु-कृष्णार्जुनमार्कण्डेयप्रभृतीनां च श्रुतिपथगलितार्थश्रुत्यनधिकारित्व-प्रसङ्गात् । तेषां चाधीतशिवागमत्वमुक्तं स्कान्दे सम्भवकाण्डे-

एतस्मिन्नन्तरे देवः कैलासे रजताचले ।

सनकादिमुनीन्द्रेभ्यस्त्रिपदार्थार्थसम्मितम् ।

रहस्यागमाम्नायाख्यं[३] सिद्धान्तं कथयंस्थितः । इति ।

उपदेशकाण्डे च –

पुरा ब्रह्मात्मजाः पुण्याः सनकश्च सनातनः ।

सनन्दनश्च भगवान् सनत्पूर्वकुमारकः[४] ।

चत्वारो ऋषयः शम्भोः पूजां पुण्यां विधाय च ।

प्रसन्नेन ततो वेदान्[५] शिवेनाध्यापिताः खलु ।

---

[१] तु वर्णिनाम्] अ, आ; अवर्णिनाम्-इ

[२] अतः] अ, आ; अथ-इ

[३] रहस्यागमाम्नायाख्यं सिद्धान्तं] अ; रहस्यागमान्ताख्यसिद्धान्तं-आ; रहस्यागमान्ताख्यं-इ

[४] सनत्पूर्वकुमारकः] अ; सनत्पूर्वः कुमारकः-आ

[५] वेदान्] आ ; वेदात्-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

आगमांश्च पुराणानि सेतिहासानि सुव्रताः ।

शिवार्चनपरा नित्यं शिवयोगेन पावनाः ।

शिवज्ञानाग्निना दग्धमहापातकसंचयाः । इति ।

शिवपुराणे काञ्चीपुरमाहात्म्ये च-

सनत्कुमारः पप्रच्छ साञ्जलिः कमलासनम् ।

भगवन् सकला वेदाः साङ्गोपाङ्गाः ससंहिताः ।

शिवागमास्तथा सर्वेऽप्यधीता भवतो मुखात् । इति ।

स्कान्दे श्वेतारण्यमाहात्म्ये-

शिवागमानां पारं च शिवाचार्यत्वमेव च ।

लब्धाश्च परमं योगं शिवसारूप्यतां गताः ।

यस्य नाम्ना वनमिदं कथितं भुवनत्रये ।

अवनायास्य भक्तस्य श्वेतनामनृपस्य तु । इति ।

पुण्डरीकपुरमाहात्म्ये-

व्याघ्रपादसुतो यत्र पुरा स्नात्वा महामुनिः ।

शिवागमस्य वै पारंगतोऽप्राप्यं सुरैरपि ।

यस्य शिष्योऽभवत् कृष्णस्तत्तीर्थं नवमं स्मृतम् । इति ।

उपदेशकाण्डे च-

पुनश्च वसुदेवस्य देवक्यां कृष्णरूपधृक् ।

जज्ञे विष्णुरमेयात्मा भृगुशापनियन्त्रितः[1] ।

---

[1] भृगुशापनियन्त्रितः] अ, इ; भृगुशापेन यन्त्रितः-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

तत्राभ्यर्च्य महादेवं कृत्वा शत्रुजयं पुनः ।

उपमन्युं समासाद्य विधिना तेन दीक्षितः ।

शैवमुख्यस्ततोऽत्यर्थं[1] भक्त्याराध्य च शङ्करम् ।

भूभारमपनीयाथ विष्णुलोकं जगाम सः । इति ।

तत्रैव बाणासुरं प्रति शिववचनम् –

तमाह पूर्ववन्नैष जेतुं शक्यस्त्वयासुर ।

इदानीं मम भक्ताग्र्यादुपमन्योर्महात्मनः ।

शिवदीक्षाऽस्य निर्वृत्ता शिवागमविशारदात् ।

भस्मधारी च सततं वीर्यवान् भक्तिसंयुतः । इति ।

तत्रैव-

सोऽपि सम्प्राप्य नित्यत्वं मार्कण्डेयो महामुनिः ।

स्वगृहं प्राप्य परया प्रीत्या पित्रोः सदावसत्[2] ।

अनन्यसदृशो लोके शिवशास्त्रविशारदः ।

शिवागमार्थविज्ञानसम्पन्नोऽद्यापि वर्तते । इति ।

किन्तु श्रुतिपथगलितानां मनुष्याणां[3] तु तन्त्रमित्यत्र

तन्त्रं नादरूपं विनिष्क्रान्तं शास्त्रं सर्वमिति श्रुतेः नादात्मना शिवकृतं वर्णपदवाक्यरचनत्मना शम्भुपदोपलक्षितश्रीश्वरप्रेरितमाया रुद्रकृतं

---

[1] शैवमुख्यस्ततोऽत्यर्थं] आ ; शैवमुख्यस्ततो तीर्थं-अ, इ

[2] सदावसत्] आ; समावसत्-अ

[3] मनुष्याणां] अ; मानुषाणां-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

वामादितन्त्रमिति मतिमद्भिरूह्यम् । तदुक्तं कामिके-

वामं पाशुपतं चैव लाकुलं चैव भैरवम् ।

न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत् । इति ।

सूतसंहितावृत्तौ च विद्यारण्यस्वामिभिः शिवागमोदाहरणं स्वीकृत्य लिखित्वा गुरुणा चोपदिष्टोऽपि तन्त्रसम्बन्धवर्जित इत्यत्र "तन्त्रसम्बन्ध इति । कापालं लाकुलं वाममित्यादिवेदविरुद्धागमसंसर्गरहितः" इति व्याख्यातम् ।

तथा हालास्यमाहात्म्ये विक्रमपाण्ड्यचरिते पाण्ड्यस्य वेदबाह्य-शास्त्राणि परित्यज्य शिवशास्त्रस्य श्रवणं श्रुतम् ।

प्रसृता वैदिका धर्माः सर्वतः क्षितिमण्डले ।

वेदबाह्यमना ये च ते गच्छन्ति सुदूरतः ।

सदा शैवानि शास्त्राणि पुराणानि शुभानि च ।

श्रृणोति विद्वद्वक्त्रेभ्यः सावधानश्च सादरम् । इति ।

तथा शिवागमस्य पूज्यत्वमुक्तं वायव्यसंहितायां-

मन्नामनिरता वाणी वाङ्मता मम नेतरा ।

लिङ्गैर्मच्छासनोद्दिष्टैस्त्रिपुण्ड्रादिभिरङ्कितः ।

ममोपचारनिरतः कायः कायो न चेतरः ।

मदिज्याकर्म विज्ञेयं बाह्यं यागादिनोच्यते ।

मदर्थे देहसंशोषस्तपः कृच्छ्रादि नो मतः ।

जपं पञ्चाक्षराभ्यासः प्रणवाभ्यास एव च ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम् ।
ध्यानं मद्रूपचिन्तार्थं नान्यदर्थसमाधयः ।
ममागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम् । इति ।

तथा यथाकथञ्चित् सामान्यविशेषत्वविलक्षणत्वेऽपि उभाभ्यां वेदान्तसिद्धान्तमार्गाभ्यामसंशयं मोक्षप्राप्तिरस्ति । तदुक्तं स्कान्दे चिदम्बरमाहात्म्ये-

वेदान्तनिष्ठिता ये तु ज्ञानिनो वीतकल्मषाः ।
मदागमपरा ये च ज्ञानपादैर्व्यवस्थिताः ।
उभयेऽपि च विन्दन्ति सायुज्यमतिदुर्लभम् ।
उभयेषु च मार्गेषु कर्मब्रह्मपरेषु च ।
वेदागमप्रसिद्धेषु ये न तिष्ठन्ति पापिनः ।
चतुर्विधैश्च ते दण्ड्या दण्डैः शास्त्रप्रचोदितैः । इति ।

उभयेऽपि च विन्दन्ति सायुज्यमतिदुर्लभम् । इति श्रुतेरयं विवेकः । सिद्धान्तानुसारिणो वेदान्तिनोऽपि वेदान्तज्ञत्वेऽपि प्रकृत्यूर्ध्वशिवागममात्रसिद्धरागादिशिवतत्त्वान्तपदार्थज्ञानार्थं मोक्षार्थं च शिवदीक्षावन्तः[1] सन्तः सद्यः सत्यशिवसायुज्यं विन्दन्ति । शिवदीक्षाराहित्ये वेदान्तज्ञत्वेऽपि न साक्षाद्विन्दन्तीति । तदुक्तं सूतसंहितायाम्-

स्थापयित्वा गुरुः शिष्यं मण्टपस्य तु मधयमे ।
ग्रन्थिच्छेदं पुनः कुर्यात् गुरूक्तेनैव वर्त्मना ।

---

[1] शिवदीक्षावन्तः] इ ; शिवदीक्षितवन्तः-अ; शैवदीक्षावन्तः-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

कृते कारुणिकेनैवमाचार्येण द्विजोत्तमाः ।
महादेवो महानन्दो महाकारुणिकोत्तमः ।
स्वात्मभूतां परां शक्तिं प्रेरयत्येव सुव्रताः ।
प्रसन्ना सा महादेवी महाकारुणिकोत्तमा ।
शिष्यस्यात्मनि चिद्रूपे स्वयं पतति निर्मला ।
महादेवस्य भक्तश्चेत् शिष्यः सद्गुरुभक्तिमान् ।
तस्य शिष्यस्य विप्रेन्द्राः कर्मसाम्ये सति द्विजाः ।
शाम्भवी शक्तिरत्यर्थं तस्मिन् पतति चिद्घने ।
तस्य प्रसादयुक्तस्य विद्या वेदान्तवाक्यजा ।
दहत्यविद्यामखिलामन्तः सूर्योदयो यथा ।
शक्तिपातविहीनोऽपि सत्यवाक् गुरुभक्तिमान् ।
आचार्याच्छ्रुतवेदान्तः क्रमान्मुच्येत बन्धनात् ।
शक्तिपातप्रकारस्य रहस्यांशश्च कश्चन ।
मया नोक्तो रहस्यत्वात् आज्ञाभङ्गभयादपि । इति ।

अत्राप्ययं विवेकः। शक्तिर्दीक्षाकर्मसम्पादयित्री सती ततः पूर्वं सामान्यरूपिणी पतति पश्चाद्दीक्षाकर्मणि साक्षाद्दीक्षात्मिका सती विशेषरूपिणी पतति। तथा पतति[१] शक्तिः ।

तस्माद्वैदिकमार्गेण मलनाशो न विद्यते ।
शैवागमोक्तमार्गेण दीक्षया मोक्ष एव हि ।

---

[१] पतति] अ,इ; पतिता-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

इति देव्यामतवचनात् मलमौढ्यात्मिकाम् अविद्यां क्रमतो दहति[१] । दीक्षानन्तरं वेदान्तवाक्यजा विद्या पृथिव्यादिप्रकृत्यन्ततत्त्वविषयाम् अनात्मन्यात्मविज्ञानादिरूपां[२] प्रकृतिजामविद्यां क्रमतो दहति । पश्चात् सिद्धान्तवाक्यजा विद्या रागतत्त्वादिशिवतत्त्वान्ततत्त्वविषयां तथाभूतां मायाजामविद्यां क्रमतो दहतीति तावत्कालं प्रकृतेरूर्ध्वं पुरुषतत्त्वभुवनं प्राप्य महाभोगं भुञ्जतीति तात्पर्यम् ।

तदुक्तं सर्वज्ञानोत्तरादिके-

तामसं जिनभक्तानां पौरुषं ब्रह्मवादिनाम् ।
नासतो विद्यते भावो नाभावो विद्यते सतः ।
तस्मादेकात्मवादोऽयं कल्पितो मूढचेतनैः ।
इत्यद्वैतग्रहाविष्टाः प्रलपन्ति दयालुभिः ।
गुरुभिः प्रतिबोध्यन्ते सिद्धान्तागमदायिभिः ।
अद्वैतबलमाश्रित्य ये विशृङ्खलवृत्तयः ।
तेषामद्वैतनिष्ठानां पुंस्तत्त्वे विलयो भवेत् ।
वेदान्तज्ञाश्च साङ्ख्याश्च योगिनः पुरुषे स्थिताः । इति ।

क्वचित् कथञ्चिद्वेदोपबृंहणत्वेन शिवागमानां सौम्यत्वमुक्तं तन्न पारमार्थिकम्। किन्तु सौम्यत्वं स्वाभाविकम् ।

---

[१] क्रमतो दहति . . . मायाजामविद्यां पर्यन्तं इ मातृकायां न विद्यते ।

[२] पृथिव्यादिप्रकृत्यन्ततत्त्वविषयाम् आनात्मन्यात्मविज्ञानादिरूपां] आ ; पृथिव्यादिप्रकृत्यन्ततत्त्वविषयात्मनात्मन्यात्मविज्ञानादिरूपां अ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

तदुक्तं कामिके-

तथा पाशुपतं सोमसिद्धान्ताख्यं च लाकुलम् ।

गारुडं भैरवं वामं भूततन्त्रं च यामलम् ।

कापालं पाञ्चरात्रं च बौद्धमप्यार्हतं तथा ।

बृहस्पतिमतं साङ्ख्यं योगं वैखानसं तथा ।

वेदान्ताख्यं च मीमांसा पुराणं धर्मशास्त्रकम् ।

वास्तुशास्त्रं तथा सूत्रं षडङ्गमितिहासकम् ।

तथा वेदाश्च चत्वारो यत्तत्र परिचोदितम् ।

सर्वं रौद्रं समादिष्टं सिद्धान्तं सौम्यमिष्यते ।

रौद्रैश्च स्थापितं यच्च विष्ण्वादिप्रतिमादिकम् ।

तत्सर्वं शैवमापाद्य शैवः समर्चयेत् ।

लिङ्गाद्यमादिशैवेन स्थापितं पूजितं तु वा ।

तद्रूपं पूजितं तैश्चेद्राष्ट्रं राजानमेव हि ।

तद्ग्रामं ग्रामसंस्थाश्च[१] सर्वा हन्ति न संशयः ।

यजनं त्रिविधं प्रोक्तम् उत्तमं मध्यमाधमम् ।

केवलं शिवमन्त्रैस्तु यजनं चोत्तमं भवेत् ।

वैदिकैः शिवमन्त्रैश्च[२] यजनं मध्यमं भवेत् ।

केवलं वैदिकैर्मन्त्रैर्यजनं चाधमं भवेत् ।

---

[१] ग्रामसंस्थाश्च] आ, इ ; ग्रामसंस्थांश्च-अ

[२] शिवमन्त्रैश्च] अ, इ; शिवमन्त्रैस्तु-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

केवलं शैविकैर्मन्त्रैर्यजेदात्मार्थमुत्तमम् ।

शैवमन्त्रसमो मन्त्रो नास्तीह[१] भुवनत्रये । इति ।

स्कान्दे युद्धकाण्डे कुमारविश्वरूपप्रदर्शनाध्याये-

शब्दजालमशेषं तत् कर्णदेशे[२] समाश्रितम् ।

आस्यमध्ये स्थिता वेदा देवदेवस्य भूसुराः ।

अक्षराणि च दन्तेषु जिह्वायां तु शिवागमाः ।

सप्तकोटिमहामन्त्रा ओष्ठमध्ये व्यवस्थिताः । इति ।

चिदम्बरमाहात्म्ये-

इति देवान् समाहूय ध्वजं वृषभलाञ्छितम् ।

पुरं प्रदक्षिणीकृत्य सभेशस्य तु सन्निधौ ।

दृढमारोपयामासुरागमोक्तेन वर्त्मना । इति ।

शिवपुराणे हेमसभानाथमाहात्म्ये-

शिवार्चनं तपो मुख्यं वेदागमनिरूपितम् ।

तपःसिद्धिप्रदं स्थानं पुण्डरीकपुरं महत् । इति ।

शिवपुराणे एकाम्रनाथमाहात्म्ये इन्द्रस्य शिवपूजाप्रकरणे-

वृत्रजिच्छिवतन्त्रोक्तैर्व्रतहोमजपादिभिः ।

प्रत्यहं प्रीणयामास कामाक्षीरमणं शिवम् । इति ।

शिवपुराणे विरिञ्चिपुरमाहात्म्ये-

---

[१] नास्तीह] आ ; नास्तीति-अ, इ

[२] कर्णदेशे] अ; कण्ठदेशे-आ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवनायक इत्यासीच्छिवभूसुरनायकः ।

कामिकाद्यागमार्थज्ञः साक्षादिव महेश्वरः । इति ।

शिवपुराणे कालहस्तिमाहात्म्ये-

सुवर्णमुखरीस्नातो जजापागमिकान् मनून् ।

प्रायश्चित्तविधानेन प्रसन्नात्मा स भूसुरः ।

यथातन्त्रं प्रयुज्येशं ययौ भूयस्तपोवनम् । इति ।

शैवपुराणे पुण्डरीकपुरमाहात्म्ये-

शिवशास्त्रं लिखित्वा यो ददाति शिवयोगिने ।

रुद्राक्षे भक्तिसंयुक्तः शिवसायुज्यमाप्नुयात् । इति ।

हालास्यपुरमाहात्म्ये-

महालिङ्गस्य पूजार्थं शिवसृष्टिद्विजोत्तमान् ।

गङ्गातीरस्थनिरतान् समाहूय महीपतिः ।

सिद्धान्तैः कामिकाद्यैस्तु महालिङ्गं निरन्तरम् ।

पूजयन्त्विति सम्प्रार्थ्य वृत्तिं तेभ्यः प्रदाय च । इति ।

पुनस्तत्रैव-

गङ्गातीर्थस्य सलिलैर्हेमकुम्भसुसम्भृतैः ।

शिवागमोक्तैः विधिभिरभ्यषिञ्चत्[1] सहोत्सवम् । इति ।

*वेदारण्यमाहात्म्ये कुलेश्वरवैभवे-

आगमोक्तेन मार्गेण पूजयामासुरादरात् ।

---

[1] विधिभिरभ्यषिञ्चत्] सम्पादकीयः पाठः ; विधिभिरभिषिञ्चत्-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सुधारूपं महेशानं शङ्करं शशिभूषणम् । इति ।

शिवपुराणे रामेश्वरमाहात्म्ये-

मन्त्रैरागमिकैस्तैस्तैर्महितं रामपूजितम् ।

रामेश्वरेति लिङ्गं तु तदाप्रभृति पप्रथे । इति ।

आगमादिपदनिर्वचनं चोक्तमंशुमदादिके-

आगतम् शिववक्त्रात्तु गतं च गिरिजामुखे ।

मतं च ऋषिभिः सर्वैर्यः स आगम ईरितः ।

तत्त्वमागम्यते येन आगमो वेति च स्मृतः ।

तनोति विपुलानर्थान् तत्त्वमन्त्रसमाश्रितान्[१] ।

त्राणं च कुरुते पुंसां तेन तन्त्रमिति स्मृतम् । इति ।

॥ इति शिवागममाहात्म्यं समाप्तम् ॥

[१] तत्त्वमन्त्रसमाश्रितान्] अ ; तत्त्वमन्त्रान् समाश्रितान्- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवदीक्षामाहात्म्यम्

तदित्थम्भूतं शिवशास्त्रं प्रोक्तप्रकारं दीक्षितैरेव श्रोतव्यं पठितव्यं च। दीक्षाविहीने तु ज्ञानादिकं सर्वं व्यर्थं स्यात्। ज्ञानादेरस्वातन्त्र्याद्दीक्षाङ्गत्वेनैव ज्ञानादिकं मोक्षसाधनं नान्यथा। तदुक्तं-

तस्य तेन तदङ्गत्वं दीक्षा सातोऽङ्गिनी भवेत्।
शिवदीक्षां तु मुक्त्वैकां सपत्राव्याहतां पराम्।
ज्ञानतो योगतश्चापि चर्यातश्च न मुच्यते।
ज्ञानादीनां तु सामर्थ्यं तत्रापि स्वं न विद्यते।
बालबालिशवृद्धस्त्रीभोगिनां सरुजां तथा।
ज्ञानादिना न मोक्षोऽस्ति तस्माद्दीक्षैव मोचिनी। इति।

केवलं ज्ञानादेव मोक्ष इत्यत्रापि ज्ञानशब्दस्य दीक्षादिरेवार्थः। तदुक्तं सुप्रभेदे-

अथातः सम्प्रवक्ष्यामि ज्ञानपादं समासतः।
तस्यादौ शिवसृष्टिश्च शृणुष्वैकाग्रमानसः।
ज्ञानं प्रवर्तते वत्स क्लान्तिनिर्णाशनाय च।
अध्वश्रेणिविनाशाय शिवव्यक्तिकराय[१] च।
अन्धकारवदज्ञानं ज्ञानं दीपवदुच्यते।
ज्ञेयं भास्करवत् प्रोक्तं पश्चाज्ज्ञानं विनश्यति।*

---

[१] शिवव्यक्तिकराय] अ, आ; शिववृत्तिकराय-इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

पाशजालानि विच्छेद्य दीक्षादिर्ज्ञानमुच्यते ।

पशुपाशपतित्वं[१] च ज्ञानेनाश्रयते बुधः ।

ज्ञानेनैव[२] तु कैवल्यप्राप्तिः तत्र[३] न संशयः । इति ।

दीक्षा कर्मण्यभिव्यक्ता क्वचित् स्वयं ज्वलन्ती च शिवज्ञान-शक्त्युपकृता शिवेच्छाशक्त्यात्मिका शिवा क्रियाशक्तिरेव । तदुक्तं पराख्ये –

धर्माधर्मक्षयकरी दीक्षेयं पारमेश्वरी ।

ज्ञानतो योगतश्चैव चर्यातश्च न मुच्यते ।

दीक्षया चात्र मुक्तिस्तु सर्वेषां प्राणिनामिह ।

तस्मात्तु शिवसामर्थ्यान्मुक्तिः सर्वत्र सिद्ध्यति । इति ।

तथा स्कान्दे भृगुशापप्रकरणे-

नात्राश्रमकृतः कश्चिदुत्कर्षो विद्यते नृणाम् ।

परां दीक्षां विना शैवीं मलत्रयविमोचिनीम्[४] ।

तस्मान्मुक्तिर्दीक्षयैव नाश्रमैर्ज्ञानकर्मभिः[५] । इति ।

स्कान्दे काशीखण्डे-

अध्वशुद्धिं विना ये च मुक्तिमिच्छन्ति मानवाः ।

---

* एतदङ्कमध्यस्थितभागाः 'आ' मातृकायां लुप्ताः ।

[१] पशुपाशपतित्वं] अ, इ; पशुपाशप . . . . -आ

[२] ज्ञानेनैव] अ, इ; अनेनैव-आ

[३] तत्र] अ, इ; तस्य-आ

[४] मलत्रयविमोचिनीम्] इ ; बन्धत्रयविमोचिनीम्-उ

[५] नाश्रमैर्नान्यकर्मभिः] इ,उ नाश्रमैर्ज्ञानकर्मभिः-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अदण्डपाणिश्चान्धस्तु गन्तुमारभते हठात् ।
यथा द्रोणिविहीनात्मा तर्तुमिच्छति सागरम् ।
अध्वशुद्धिविहीनो हि तथा मुक्तिं समीहते ।
किमत्र बहुनोक्तेन भूयो भूयो वदामि च ।
षदध्वशुद्धियुक्तात्मा मुक्तिमेति न चान्यथा । इति ।
वामनपुराणे वासुदेवं प्रत्युपमन्युः-
अहं ते कथयिष्यामि सर्वपापविशोधनम् ।
संस्कारं परमं पुण्यं शिवेन परिभाषितम् ।
सम्यक् कृताधिकारः स्यात् पूजादिषु नरो यतः ।
संस्कारः कथ्यते तेन षडध्वपरिशोधनम् । इति । श्रीमद्रौरवे-
पतयः साञ्जनाः प्रोक्ता ब्रह्मविष्ण्विन्द्रसंज्ञिताः ।
तेषामत्यन्तम्[1] ऐश्वर्यं विद्येशानां महात्मनाम् ।
दृष्ट्वा तद्योगमीप्सन्तः तेषां शरणमभ्ययुः ।
विद्याराजाधिराजेशास्तेऽत्यन्तनिरपेक्षिणः ।
जरामरणसंसारबन्धभेदविचक्षणाः ।
विद्यामण्डपदीक्षाभिर्यजनेज्यापरिग्रहैः ।
विद्याव्रतोपदेशैश्च मन्त्रतन्त्राङ्गनिःसृतैः ।
दिव्यैरनुग्रहैश्चान्यैः शुद्धतत्त्वावभासिभिः[2] ।

---

[1] तेऽत्यन्तशुद्धं] मुद्रितः पाठः ; तेषामत्यन्तम्-आ, इ, उ

[2] शुद्धसत्त्वावभासिभिः] उ ; शुद्धतत्त्वावभासिभिः-आ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

तेषामनुग्रहं चक्रुर्मन्त्रमन्त्रेश्वराः[1] शिवाः ।
पितामहादयश्चापि तेभ्येऽवाप्य महोदयाः ।
शैवं परमनिर्वाणकारणं ज्ञानमुत्तमम् ।
ऋषिभ्यो विबुधेभ्यश्च पितृभ्यश्च यथाक्रमम् ।
प्रयच्छन्ति महामन्त्रतन्त्रराजमहाध्वरान् ।
पितामहनियोगाच्च ऋषयश्छिन्नसंशयाः ।
दीक्षाविधिविधानज्ञा मनुष्येभ्यः प्रचक्षते ।
शिवेन्दुकिरणादेतत् सूत्रमात्रं विनिःसृतम् ।
पाशौघतिमिरान्धानां प्रकाशकरणं[2] परम् । इति ।

शिवपुराणे हेमसभानाथमाहात्म्ये-

चकार व्याघ्रपादस्तं कृतार्थं शिवदीक्षया ।

स खलु कनकवर्मा व्याघ्रपादप्रसाद-
प्रकटितशिवदीक्षालब्धदिव्यानुभावः ।
शिवमनुजपशीलः शङ्करे ताण्डवेशे
विरचितदृढभक्तिस्तत्र वासं चकार । इति । पुनस्तत्र-

पुरा च ऋषयो राजन् एकोनत्रिसहस्रकाः ।
दीक्षिताः सार्धमावाभ्यामद्राक्षुः शिवताण्डवम् । इति ।

तदुक्तमन्यत्र-

---

[1] चक्रुर्मन्त्रतन्त्रेश्वराः] मुद्रितः पाठः ; चक्रुर्मन्त्रमन्त्रेश्वराः-आ, इ, उ
[2] प्रकाशकरणं] आ, इ, उ प्रकाशजनकं- मुद्रितः पाठः

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

यथा मृगपतिं दृष्ट्वा वने भीतो गजस्तथा ।

अदीक्षितार्चितं लिङ्गं दृष्ट्वा भीतो महेश्वरः । इति ।

शिवपुराणे-

अदीक्षाविधिसंनाहमपास्तनियमश्रमम् ।

अमन्त्रकल्पसापेक्षमर्चनं न विभोरिदम् । इति ।

शैवपुराणे गणेश्वरसंहितायाम्-

संस्थाप्य स्वात्मनो देवं नन्दिनं प्राञ्जलिस्तदा ।

प्रणम्य दण्डवद्भूमौ देवैः सार्धं गणेश्वरः ।

दीक्षां शिवात्मिकां तेषां प्रार्थयामास नन्दिनः[१] ।

पुनस्तत्रैव-

तेऽपि विस्मयमापन्नाः शिवलीलाप्रहर्षिणः ।

कृतकृत्या वयं धन्या[२] यच्छिवेनैव दीक्षिताः । इति ।

षड्वाहस्त्रिकायाम्-

दीक्षया श्रवणे योग्यो दीक्षया पूजने क्षमः ।

दीक्षायाऽऽश्रमधर्मास्तु प्रवर्तन्ते यथार्थतः ।

दीक्षया प्राप्यते ज्ञानं दीक्षया सिद्धिभाग् भवेत् ।

मुक्तिदानेन वै दीक्षा ज्ञानादावन्तरङ्गिणी ।

शिवदीक्षाविशुद्धा ये सर्वत्रैवाधिकारिणः ।

---

[१] प्रार्थयामास नन्दिनः] आ, उ ; प्रीणयामास नन्दिनम् -इ

[२] वयं धन्या] इ,उ ; ययुर्धन्या-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

नास्ति दीक्षासमं तीर्थं नास्ति दीक्षासमं तपः ।

नास्ति दीक्षासमो धर्मो नास्ति दीक्षासमो गुणः ।

नास्ति दीक्षासमं ज्ञानं नास्ति दीक्षासमा स्मृतिः ।

नास्ति दीक्षासमं ज्ञेयं नास्ति दीक्षासमं कुलम् । इति ।

रौरवसंग्रहे च –

एवं शैवाध्वरं प्राप्य दीक्षामन्त्रसमुद्भवम् ।

न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः । इति ।

दीयते येन वै ज्ञानं क्षीयते पाशबन्धनम् ।

तस्मात् संस्कार एवात्र दीक्षेत्यपि च कथ्यते । इति ।

शिवागमे-

दीयते ज्ञानसद्भावं क्षीयते च मलत्रयम् ।

दानक्षपणधर्मित्वात् दीक्षाशब्द इहोच्यते । इति ।

वरुणपद्धत्यां भेदः प्रतिपादितः-

चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ।

शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ।

चक्षुरुन्मील्य यत्तत्त्वं ध्यात्वा शिष्यं समीक्षते ।

पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी भवेत् ।

निधाय दक्षिणे हस्ते शिवं सर्वाङ्गसंयुतम् ।

संस्पृशेच्छिष्यमूर्धादि स्पर्शदीक्षा भवेदियम् ।

तत्त्वे चित्तं समाधाय बृंहितान्तरचेतसा ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

उच्चरेत् संहितामन्त्रान् वाग्दीक्षाथ प्रकीर्तिता[१] ।
मानसं विधिमाश्रित्य मानसी च विधीयते[२] ।
शास्त्रस्य सम्प्रदानेन शास्त्रदीक्षा समीरिता ।
योगेन योगदीक्षा स्यात् शिवत्वे संव्यवस्थिता[३] ।
दीक्षास्ताभिः समायुक्ताः परिचारसमाह्वयाः ।
न तु लिङ्गार्चने योग्याः किमु दीक्षादिकर्मणि ।
जात्युद्धारविहीनत्वात्[४] समये संव्यवस्थिताः ।

वायव्ये-

असच्छूद्रान्त्यजातीनां कारूणां च विशेषतः ।
तथा सङ्करजातीनां नाध्वशुद्धिर्विधीयते ।
अत्रानुलोमजाता ये युक्ता ये च द्विजादिषु ।
तेषां चैवाध्वशुद्ध्यादिकार्यमात्रं कुलोचितम् । इति ।

सुप्रभेदे-

अनुलोमाश्च षट् प्रोक्ताः प्रतिलोमास्त्रयस्त्रिधा ।
अन्तरालाश्च सर्वेषां दीक्षाकर्मणि योजनम् ।
व्रात्याः सर्वेऽपि संत्याज्याः सर्वकर्मबहिष्कृताः । इति ।

---

[१] प्रकीर्तिता] आ, इ, उ ; प्रवर्तताम्- मुद्रितः पाठः
[२] मानसी च विधीयते] आ, इ, उ ; मानसीत्यभिधीयते-मुद्रितः पाठः
[३] शिवत्वे संव्यवस्थिता] आ,इ,उ ; शिवत्वे ऽस्य व्यवस्थिता- मुद्रितः पाठः
[४] जात्युद्धारविहीनत्वात्] इ, उ ; जात्युद्धारणहीनत्वात्-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

किरणे-

यतस्तेनान्त्यजस्यापि किन्तु दीक्षा तु मानसी ।

कारुकाणां तु संस्पर्शात् न हौत्रीं परिकल्पयेत् ।

ज्ञात्वा तेषां परां भक्तिं लोभाच्चेद्दोषमाप्नुयात् । इति ।

वायव्ये-

तेऽप्यकृत्रिमभावाश्चेत् शिवे परमकारणे ।

पादोदकप्रदानाद्यैः कुर्यात् पाशविशोधनम् ।

पुनरन्यत्र-

अमद्यपः कुलीनश्च नित्यधर्मपरायणः[१] ।

शूद्रः क्षत्रियवज्ज्ञेयः शेषा निन्द्यास्ततो भृशम् ।

दीक्षा हौत्री न तेषां स्यात् भक्तानां चाक्षुषी मता । इति ।

वरुणपद्धत्यां हौत्रीभेदः प्रोक्तः-

रजःकुण्डवती हौत्री सा द्विभेदा किलोदिता ।

समासाद्विविधैवेयं[२] दीक्षा तज्ज्ञैरिहेष्यते ।

ज्ञानवती भवत्येका क्रियावत्यपरा स्मृता ।

विनेज्यानलकर्मादि मनोव्यापारमात्रतः ।

दीक्षा ज्ञानवती प्रोक्ता संयक् तत्त्वावबोधिका[३] ।

---

[१] नित्यधर्मपरायणः] आ, उ ; नित्यं धर्मपरायणः- इ

[२] समासाद्विविधैवेयं] आ, इ, उ ; समासाच्च द्विधैवेयं- मुद्रितः पाठः

[३] तत्त्वावबोधजा] मुद्रितः पाठः ; तत्त्वावबोधिका- अ, आ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

इज्यानलवती या तु क्रियाकौशल्यसम्भवा[१] ।

क्रियावत्यथ सानेका निर्बीजाथ सबीजिका ।

कालोत्तरे-

दीक्षा क्रियावती प्रोक्ता ब्राह्मणादिचतुष्टये ।

पुनर्हौत्री त्रिधा प्रोक्ता वामने-

शाम्भवी चैव शाक्ती च मान्त्री चेति शिवागमे ।

दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना ।

नासाग्राच्छुलिका[२] यावत् तत्त्वज्ञानदृशा गुरुः ।

गुरोरालोकमात्रेण स्पर्शात् सम्भाषणादपि ।

सद्यः संजायते चात्र पाशोपक्षयकारिणी[३] ।

सा दीक्षा शाम्भवी प्रोक्ता सा पुनर्भिद्यते द्विधा ।

तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः[४] ।

यया स्यान्निर्वृतिः सद्यः सैव तीव्रतरा मता ।

तीव्रा तु जीवतोऽत्यन्तं पुण्यपापविशोधिका ।

शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य च ।

---

[१] क्रियाकौशलसम्भवा] मुद्रितः पाठः ; क्रियाकौशल्यसम्भवा- अ, आ, इ

[२] नासाग्राच्छुलिका] अ, इ; नखाग्राच्छुलिका-आ, उ

[३] पाशोपक्षयकारिणी] अ, इ, उ; पाशोपक्षयभेदतः-आ

[४] सा दीक्षा शाम्भवी प्रोक्ता सा पुनर्भिद्यते द्विधा ।
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः । अयं श्लोकः 'आ' मातृकायां न दृश्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

गुरुणा योगमार्गेण क्रियते ज्ञानचक्षुषा ।

मान्त्री क्रियावती दीक्षा कुण्डमण्डपपूर्विका[१] ।

मन्दमन्दतरोद्देशात् कर्तव्या गुरुणा बहिः ।

ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत् ।

योऽन्यथा कुरुते मोहात् स विनश्यति दुर्मतिः । इति ।

एका ज्ञानवती प्रोक्ता द्वितीया तु क्रियावती । इति च श्रीमच्चिन्त्य-विश्वसादाख्ये प्रोद्धृत्योक्त्वा पुनः –

एवं मान्त्री क्रियादीक्षासम्पन्नो गुणसत्तमः ।

स एव योगदीक्षायामधिकारी च नान्यथा ।

पूर्वदीक्षासमायुक्तशिष्याणामुत्तमं तथा ।

आणवं[२] शक्तिसम्भूतं शाम्भवं त्रिविधं भवेत् ।

शाक्ती शाम्भवदीक्षा च क्रियते तत्त्वया मया ।

अन्यैराणवदीक्षा तु मन्दतीव्रादिभेदतः । इति च प्रोक्तम् ।

अन्यैरपि योगबलवद्गुरुभिः क्रियादीक्षामन्तरापि[३] अतिपक्वेऽतिदरिद्रे वा मन्त्रादिवैकल्यकृतक्रियादीक्षे वा शाक्तीशाम्भव्योरेकतरा स्वान्तरितान्या च कार्येऽति गुरवः । यथाकथंचित् कृताभ्यासयोगिभिरपि गुरुभिर्मन्त्रक्रियाभावना साङ्गोपाङ्गसाकल्यवत्या क्रियादीक्षया दीक्षितस्य

---

[१] कुण्डमण्डपपूर्विका] अ, इ, उ; कुण्डमण्डलपूर्विका-आ

[२] आणवं] आ, इ ; प्रणवं-अ

[३] क्रियादीक्षामन्तरापि] अ, आ ; क्रियादीक्षा मन्दतरापि- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

कृतस्य करणासम्भवादिति न्यायात् तदेतत् क्रिया दीक्षाङ्गतया[१] सद्यः समुच्चरितप्रासादमन्त्रसमुद्धृतिकृतशिवयोजन-षाड्गुण्योदयशिवत्वाभिव्यक्तिसम्पादिका मन्त्रमात्रात्मिका[२] सती सह संक्षिप्ता शाक्ती शाम्भवी च सह कार्येत्यप्यर्थोऽन्तः स्फुरति। तदेतत्त्रिविधदिक्षाविहीनः पशुः । तदुक्तं-

चतुर्वेदधरो विप्रः शिवदीक्षाविवर्जितः ।
दुष्टचाण्डालभाण्डेषु यथा भागीरथीजलम् ।
कोटिविप्रसमः शूद्रः शिवदीक्षासमन्वितः ।
सुदुर्लभं शिवज्ञानं तदभ्यासश्च सुदुर्लभः ।
सुदुर्लभमिदं ज्ञात्वा शिवे भक्तिं समाचरेत् । इति ।

॥ इति शिवदीक्षामाहात्म्यं समाप्तम् ॥

---

[१] *दीक्षे वा शाक्तीशाम्भव्योरेकतरा स्वान्तरितान्या च कार्येऽति गुरवः । यथाकथंचित् कृताभ्यासयोगिभिरपि गुरुभिर्मन्त्रक्रियाभावना साङ्गोपाङ्गसाकल्यवत्या क्रियादीक्षया दीक्षितस्य कृतस्य करणासम्भवादिति न्यायात् तदेतत् इत्ययं भागः इ मातृकायां न विद्यते।

[२] मन्त्रमात्रात्मिका] आ ; तन्मन्त्रमन्त्रात्मिका-अ,उ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

शिवभक्तमाहात्म्यम्

ततः शिवशास्त्रं शिवदीक्षया दीक्षितैः[1] चतुर्वर्णैरेव पठितव्यम् । तदुक्तं सुप्रभेदे-

साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम् ।
शुद्धशैवमिदं तन्त्रं न देयं न प्रकाश्यकम् ।
दीक्षितस्यैव धीरस्य शिवभक्तिपरस्य च ।
श्रावणीयं न चान्यत्र कथनं हि प्रशस्यते ।
चतुर्णां शुद्धशैवानां दीक्षया प्रापयेच्छिवम् ।
लौकिकाचारमार्गेण सर्वेषां वर्तनं श्रृणु ।
अध्ययनं चाध्यापनं यजनं याजनं तथा ।
दानं प्रतिग्रहं चैव तेषां कर्माणि चोच्यते ।
साक्षाच्छिवमयाः प्रोक्ताः कामिकाद्यागमास्त्विह ।
तेषामध्ययनान्येव तस्याध्ययनमुच्यते ।
तेषामध्यापनान्येव तस्याध्यापनमेव हि ।
शिवाराधनया तस्य यजनं याजनं तथा ।
शिवमुद्दिश्य यद्द्रव्यं दत्तं तद्दानमेव च ।
प्रतिग्रहं ततो वाथ तस्य षट् कर्म उच्यते ।
शिवसद्भावयुक्तस्य शुद्धशैवस्य धीमतः । इति ।

---

[1] शिवदीक्षया दीक्षितैः] अ,उ; शिवदीक्षितैः-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

मकुटे-

निर्वाणदीक्षितानां तु दातव्यं शिवयोगिनाम् ।

अन्येषां तु न दातव्यमिदं तन्त्रमनुत्तमम् । इति ।

काञ्चीपुरमाहात्म्ये च –

ब्राह्मणं वेदविद्वांसं शिवभक्तं जितेन्द्रियम् ।

भूतिरुद्राक्षसम्पन्नं शिवपूजापरायणम् ।

आगमार्थपरिज्ञाननिरतं शिवधर्मिणम् ।

क्षत्रियं वैश्यमपि वा शूद्रं वा प्रतिलोमजम् ।

अनुलोमोद्भवं वापि साक्षादाम्रेशसंश्रयम् ।

भक्त्या वित्तानुसारेण गृहक्षेत्रधनादिभिः ।

वासयेदधिकाञ्चीशचरणाम्भोजभक्तितः ।

प्रतिष्ठया तु देवानां यत्फलं तदुदीरितम् ।

तत्फलं सकलं लब्ध्वा मुच्यते भवसागरात् । इति ।

शैवपुराणे-

इदं हि शिवभक्ताय शिवशास्त्रावलोकिने ।

शिवदीक्षाविशुद्धाय प्रकाश्यं मुनिपुङ्गवाः । इति ।

तथा किरणवृत्तौ भगवता रामकण्ठाचार्येण-

अत एवास्य निर्वाणदिक्षा सम्पन्नेति प्रतीयते । नादीक्षितानां श्रवणाधिकार इति वक्ष्यतीत्युपक्रम्य यदवाप्य नराः सर्वं इत्यत्र सर्वं इति ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा म्लेच्छादयोऽपि हीति श्रुत्यधिकारिण एव

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

गरुत्मतोऽधिकारप्रक्रमतः सर्वपदस्य अनियतार्थत्वादिति व्याख्यातम्। न तु दीक्षाविहीनैः पठितव्यम्।

तदुक्तं कामिके-

दीक्षाविहीना विप्राद्यास्त्रिवर्णाः शूद्रजातयः।

पठन्ति शिवशास्त्रं चेद्राजराष्ट्रं विनश्यति।

चिन्त्यविश्वे-

विप्राद्यदीक्षितेनैव[१] शिवज्ञानं न लेखयेत्।

अदीक्षितसकाशे तु नाध्येतव्यं विशेषतः। इति।

वीरतन्त्रे-

नादीक्षितैस्तु[२] श्रोतव्यं न देयं न प्रकाश्यकम्।

शिष्याणां चैव दातव्यं समासात् कथयामि ते। इति।

अन्यत्र च-

पशुना लेखयेन्नैव शिवज्ञानं प्रयत्नतः।

न समीपे पशूनां च कुर्यादध्ययनं बुधः। इति।

चतुर्वर्णेष्वपि दीक्षिता एव श्रेष्ठाः।

तदुक्तं शैवपुराणे-

गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्य च।

शिवसंस्कारसम्बन्धाज्जातिभेदो न विद्यते।

---

[१] विप्राद्यदीक्षितेनैव] अ, उ; विप्राद्यदीक्षितैर्नैव-आ; विप्राद्यादीक्षितेनैव-इ

[२] नादीक्षितैस्तु] अ, इ; अदीक्षितैर्न-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवदीक्षाभिजातस्य पूर्वजातिं न चिन्तयेत् ।

सम्प्रतिष्ठितलिङ्गे तु न यथापूर्वभावना । इति ।

शिवधर्मे-

स्थावरं जङ्गमं चैव द्विविधं लिङ्गमिष्यते ।

स्थावरं स्थापितं लिङ्गं जङ्गमं दीक्षितं विदुः ।

जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत् ।

तस्माल्लिङ्गद्वयं प्राज्ञो नावमन्येत सर्वदा । इति ।

श्रीमन्मतङ्गे-

शिववच्छिवभक्तास्तु[1] द्रष्टव्याः शिवकाङ्क्षिभिः ।

संस्कृताश्च शिवैर्मन्त्रैर्गुरुणा मन्त्रमूर्तिना ।

वागीशीगर्भसम्भूताः सर्वे प्राप्तवरा नराः ।

यथोक्तशिवसंस्कारपवित्रीकृतमूर्तयः ।

सर्वे समानधर्माणस्तथाप्येष विधीयते । इति ।

कामिके-

इन्धने वह्निसंयोगाद्वृक्षनाम न विद्यते ।

गतं शूद्रस्य शूद्रत्वं द्विजत्वं ब्राह्मणस्य तु ।

शिवसंस्कारसम्बन्धाज्जातिभेदो न विद्यते । इति ।

अन्यत्र च-

---

[1] शिववच्छिवभक्तास्तु द्रष्टव्याः] इ, उ ; शिववच्छिव . . . . -अ; शिवश्च शिवभक्तास्तु द्रष्टव्याः-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

काञ्चनं रजतं ताम्रं लोहं चेति चतुष्टयम् ।
तत् प्रयाति सुवर्णत्वं रसभेदप्रभावतः[1] ।
रससिद्धं[2] यथा ताम्रं न भूयस्ताम्रतां व्रजेत् ।
ज्ञानसिद्धस्तथा देही न भूयः शूद्रतां व्रजेत् ।[3]
यथा शुक्तिगतं तोयं मौक्तिकं जायते ध्रुवम् ।
न पुनस्तोयतां याति मौक्तिकत्वं न मुञ्चति । इति ।
ज्ञानलक्षणसमुच्चये-
वागीशी जननी यस्य व्योमव्यापी पिता शिवः ।
मन्त्रैः शिवाध्वरे जातः स शूद्रः स्यात् कथन्त्विति ।
मृद्भावना घटादीनां संस्कारान्न कदा यथा ।
तथैव पाशहानाच्च न प्रकृत्यास्तु जातयः[4] ।
नराणां शिवसंस्कारात् शिवत्वं न भवेद्यदि ।
न भवेयुस्तदा[5] नूनं द्विजदेवादिदेशिकाः ।
मन्त्रसंस्कारदीक्षाभिः संस्कृतं गुरुणा सदा ।
चराचरं प्रपद्येत शिवत्वं तत्क्षणाद् ध्रुवम् । इति ।

---

[1] रसवेधप्रभावतः] आ, इ, उ ; रसभेदप्रभावतः-अ
[2] रसविद्धं] आ, उ ; रससिद्धं-अ, इ
[3] इदमर्धं 'आ' मातृकायां न विद्यते ।
[4] जातयः] अ, इ; जायतः-आ
[5] भवेयुस्तदा] अ, इ; भवेयुस्तथा-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

चिन्त्यविश्वे-

शिवलिङ्गे शिलाबुद्धिं कुर्वाण इव पातकी ।

श्रेष्ठत्वं विद्यते तस्य दीक्षया तु विशेषतः ।

यस्य चित्तं शिवे लीनं[१] तस्य जात्यादि न स्मरेत् ।

रजतं ताम्रकं वापि सीसमायसकं तथा ।

वेधितं गुलिकाद्याभिर्दीक्षितांश्च नयेत् तथा ।

पूर्वरूपं च संज्ञां च चिह्नं तन्नामभेदकम् ।

हेमत्वसिद्धौ सर्वं च समानत्वं प्रपद्यते ।

कामिके-

विप्रादयोऽपि शूद्राः स्युर्गुणं तस्मात् समुद्धरेत् ।

शूद्रजातिं समुद्धृत्य[२] स्वाहान्तेनैव मूलतः ।[३]

स्कन्दकालोत्तरे-

जात्युद्धरणहोमं तु एकैकं तु शतं शतम् ।

दहेद्वै शूद्रजातिं तु[४] अनलेन तु षण्मुख ।

सच्छूद्रत्वं योजयित्वा क्रियां वै षोडशं कुरु ।

साक्षाद्विप्रत्वमापन्ने पश्चाद्दीक्षां कुरुष्वथ ।

---

[१] शिवे लीनं] इ, उ ; भवेल्लीनं-अ; शिवे लग्नं-आ।

[२] शूद्रादिजातिमुद्धृत्य] आ, उ ; शूद्रजातिं समुद्धृत्य-अ, इ

[३] स्वाहान्तेनैव मूलतः] अ, इ,उ; स्वाद चै शूद्रजातिं तु -आ

[४] "स्कन्दकालोत्तरे . . . शूद्रजातिं तु" पर्यन्तं "आ" मातृकायां न दृश्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

त्रैवर्णिकानामेवं तु कारयेद्विधिना बुधः । इति ।

कामिके-

नमो वौषट् च शूद्रस्य प्रणवादिविवर्जितम् ।

निर्वाणदीक्षितो यस्तु प्रणवेन तु योजयेत् । इति ।

मकुटे च-

निर्वाणदीक्षिते शूद्रे[1] प्रणवं तु नियोजतेत् । इति ।

सुप्रभेदे-

यतीनां शुद्धशैवानाम् अन्यमाहेश्वरात्मनाम्[2] ।

विशेषभोजनं दानं कुर्यात् तत्रैव शक्तितः । इति ।

अदीक्षिता यद्यपि शिवभक्ता मुक्तभक्तीतरेभ्यः श्रेष्ठा एव भवन्ति ।[3]

शिवभक्तलक्षणम् उक्तमुपदेशकाण्डे-

शिवभक्ता महात्मानः सन्ति देवेषु केचन ।

दैत्येषु यातुधानेषु यक्षगन्धर्वभोगिषु ।

मुनीश्वरेषु मर्त्येषु ब्राह्मणेषु नृपेष्वपि ।

ऊरुजेष्वपि शुद्रेषु सङ्करेषवपि सर्वशः ।

वर्णाश्रमव्यवस्थाश्च नैषां सन्ति मुनीश्वराः ।

---

[1] निर्वाणदीक्षिते शूद्रे] उ; निर्वाणदीक्षितेन्द्रे . . . .-अ, इ; निर्वाणदीक्षितः शूद्रे-आ

[2] अन्यमाहेश्वरात्मनाम्] अ, आ, उ ; मर्त्यमाहेश्वरात्मनाम्-इ

[3] मुक्तभक्तीतरेभ्यः श्रेष्ठा एव भवन्ति] आ,उ; मुक्तभक्तीतरेऽप्यश्रेष्ठा भवन्ति-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

केवलं शिवरूपास्ते सर्वे माहेश्वराः स्मृताः ।

अतिवर्णाश्रमाः प्रोक्ताः सर्ववेदेषु सत्तमाः । इति ।

वायव्यसंहितायाम्-

एवमष्टविधं लिङ्गं यस्मिन् म्लेच्छेऽपि वर्तते ।

स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ।

न मे प्रियश्चतुर्वेदी[1] मद्भक्तः श्वपचोऽपि यः ।

तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्[2] । इति ।

वासिष्ठलैङ्गे-

शिवेति वाचं यो नित्यं चण्डालोऽपि वदेन्मुदा ।

सह तेन वदेद्वाचं सह तेन वसेत् सदा । इति ।

वृद्धाचलमाहात्म्ये च-

चिह्नैर्युतो विप्रवरश्च विद्वान् यदि श्वपाकोऽपि स एव भक्तः ।

नान्यश्चतुर्वेदधरोऽपि पूज्यो देयं च तस्मै स शिवस्वरूपः ।

उपदेशकाण्डे-

पापिष्ठस्यापि वै मुक्तिर्भस्मरुद्राक्षधारिणः ।

---

[1] मे प्रियश्चतुर्वेदी] अ, इ, उ; मत्प्रियश्चतुर्वेदी-आ

[2] श्लोकद्वयमिदं समानतया शिवधर्मे प्राचीनशैवग्रन्थे ऽपि दृश्यते ।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते ।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ।
न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचोऽपि यः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् । शिवधर्मः १: २९- ३०

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

इति सर्वत्र वेदेषु पुराणेष्वागमेष्वपि ।

बहुधा गण्यते लोके सर्वैरपि महात्मभिः । इति ।

भक्तिलक्षणं चोक्तं सूतसंहितायाम्-

शिवज्ञानैकनिष्ठानां शिवज्ञानस्य सुव्रत ।

दूषकस्य शिरश्छेदः शिवभक्तिः प्रतीयते[१] ।

लेखनं शिवविद्यायाः प्रदानं पुस्तकस्य च ।

शिवभक्तिरिति प्रोक्ता शिवशास्त्रविशारदैः । इति ।

किरणे-

भोज्यमन्नं त्रयाणां तु शूद्रान्नं न कदाचन ।

शौचाचारसमायुक्ताः शूद्रा येऽमद्यपाः शुभाः ।

रुद्रार्चनपरा भक्ता भोज्यं तेभ्यो ऽन्त्यजात् न हि[२] । इति ।

॥ इति शिवभक्तमाहात्म्यं समाप्तम् ॥

---

[१] प्रतीयते-अ, इ; न दीयते-आ

[२] भोज्यं तेभ्योऽन्त्यजात् न हि] आ,उ ; भोज्यन्ते भोग्यजानपि-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

आदिशैवादिमाहात्म्यम्[१]

कामिके-

ऋषीणामपि सर्वेषां वक्ष्ये गोत्रविनिर्णयम् ।

द्विविधं गोत्रमत्रोक्तं दीक्षोत्थं जातिजं तथा ।

कौशिकः काश्यपश्चैव भरद्वाजोऽथ गौतमः ।

अगस्त्योऽत्रिर्वसिष्ठस्तु जमदग्निश्च भार्गवः ।

अङ्गिराश्च मनुश्चाद्यो द्विविधाश्च प्रकीर्तिताः ।

शिवसृष्टिसमोपेता मुनयस्तद्विवर्जिताः ।

शिवसृष्ट्यन्विताश्चैते पञ्चवक्त्रेषु दीक्षिताः ।

शिवेन तत्कुलोत्थाः स्युः शैवाः सान्तानिका[२] द्विजाः।

आदिशैवास्तु ते ज्ञेयाः सर्वानुग्राहकाः स्मृताः ।

सुप्रभेदे-

दीक्षितानां द्विजातीनामात्मार्थमनुलोमिनाम् ।

परार्थमादिशैवानामात्मार्थसहितं भवेत् ।

कामिके-

भृत्त्यर्थं[३] ये शिवं विप्राः सामान्यास्त्वर्चयन्ति चेत् ।

षाण्मासात् पतनं यान्ति यस्मात् तान् परिवर्जयेत् ।

---

[१] शीर्षकमिदं इ मातृकायां न दृश्यते ।

[२] शैवाः सान्तानिका] अ, इ, उ; शैवसन्तानिका-आ

[३] भृत्त्यर्थं] आ,उ ; वृत्त्यर्थं-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0 In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवदीक्षाभिषिक्तस्य[1] शिवविप्रस्य धीमतः ।
शिवाज्ञावशतस्तस्य परार्थेज्या न दोषदा ।

शिल्पे-

शिवार्चनं चैव शिवद्विजानां[2] वैखानसं पूजनमेव विष्णोः ।
तथार्चयेदन्यमहीसुरश्चेच्चण्डालकं देवलकं वदन्ति ।

अन्यत्र-

अदीक्षितस्तु विप्राणां षाण्मासं पूजयेद्यदि ।
षाण्मसात् पतनं यान्ति स वै देवलकः स्मृतः ।

वीरतन्त्रे-

भृत्यर्थं[3] सर्वदा कालमादिशैवः शिवं यजेत् ।
तच्च स्वधर्मानुष्ठानं न दोषाय प्रकल्पते ।
अदीक्षितश्चतुर्वेदी शिवलिङ्गं तु न स्पृशेत् ।
दीक्षितश्चापि यो विप्रो भृत्यर्थं[4] तु न पूजयेत् ।
आत्मार्थपूजनं कुर्यात् परार्थं नैव पूजयेत् ।

वीरतन्त्रे-

अदीक्षितश्चतुर्वेदी शिवपूजां न कारयेत् ।

---

[1] शिवदीक्षाभिषिक्तस्य] आ,उ ; शिवदीक्षाविशुद्धस्य-अ, इ

[2] चैव शिवद्विजानां] आ ; शैवशिवद्विजानां-अ, इ, उ

[3] भृत्यर्थं] आ,उ ;वृत्त्यर्थं-अ; वृभूत्यर्थं- इ

[4] भृत्यर्थं] आ,उ ; वृत्त्यर्थं-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

भृत्येन ये[१] पूजयन्ति दीक्षाविधिविवर्जिताः[२] ।
षाण्मासात् पतनं यान्ति ते वै देवलकाः स्मृताः ।
त्रीणि वर्षाणि भृत्यर्थं[३] स्थिरलिङ्गे तु[४] दीक्षितः ।
पूजयेद्यदि विप्रस्तु स वै देवलकः स्मृतः ।

शैवरत्नाकरे-

अदीक्षितश्च यो विप्रश्चतुर्वेदपरोऽपि वा ।
संस्पृशेद्यदि वा लिङ्गं श्वानो वा स्पर्शितो[५] यदि ।
अदीक्षितश्च यो विप्रः कुर्याल्लिङ्गस्य पूजनम् ।
अरण्ये निर्जले देशे भवति[६] ब्रह्मराक्षसः ।
चतुर्वेदेष्वहङ्कारी शिवलिङ्गं तु पूजयेत् ।
राजराष्ट्रविनाशं च[७] तस्य ग्रामो विनश्यति ।

अन्यत्र-

योऽर्चयेत् मन्त्रपूर्वं[८] तु स वै देवलकः स्मृतः ।

---

[१] भृत्येन ये] उ ; वृत्त्यै च ये- अ, आ ; वृते चैव- इ

[२] दीक्षाविधिविवर्जिताः] अ, आ,उ ; दीक्षिता विधिविवर्जिताः- इ (छन्दोभङ्गः)

[३] भृत्यर्थं] उ वृत्त्यर्थं-अ,आ,इ

[४] स्थिरलिङ्गे तु] अ, आ,उ ; स्थिते लिङ्गेषु- इ

[५] श्वानो वा स्पर्शितो] इ, उ ; श्वानो वा स्पृशिते-अ; शुना वा स्पर्शितो-आ

[६] भवति] अ, इ, उ; स भवेत्-आ

[७] राजाराष्ट्रविनाशं च] आ,उ ; राजराष्ट्रा विनश्यन्ति-अ, इ

[८] मन्त्रपूर्वं] अ; वर्णपूर्णं-आ ; . . . . त्रपूर्वं- इ ; वर्णपूर्वं-उ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

योगजे-

अदीक्षितश्चतुर्वेदी परार्थपूजां न कारयेत् ।

सन्ताने-

अदीक्षितोऽपि[१] यो विप्रः षाण्मासं तु शिवं स्पृशेत् ।

सोऽपि देवलकः प्रोक्तः स नार्हो देवपूजने ।

दीक्षितश्चापि यो विप्रो भृत्यर्थं[२] वत्सरत्रयम् ।

पूजयेद्यदि देवेशं सोऽपि देवलको भवेत् ।

मकुटे-

विप्रक्षत्रियविड्छूद्रा दीक्षिताश्च प्रवेशकाः ।

आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ।

अंशुमति-

विप्रक्षत्रियवैश्याश्च शूद्राश्चैव तु दीक्षिताः ।

आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ।

चातुर्वर्ण्योद्भवस्त्रीणामर्चनं तु विशेषतः ।

कामिके-

शिवाय शिवविप्रेभ्यो दद्याद्गां दक्षिणान्विताम् ।

दशनिष्कं तदर्धं वा तदर्धं निष्कमेव वा ।

तत्रैव-

---

[१] अदीक्षितोऽपि] अ, इ,उ; अदीक्षितस्तु-आ

[२] भृत्यर्थं] आ,उ ; वृत्त्यर्थं-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

परार्थयजनं कार्यं शिवविप्रेण नित्यशः ।
धार्मिकः कथ्यते नित्यमादिशैवो द्विजोत्तमः ।
अन्येषां स्वार्थमेव स्यात् कुर्युश्चेत् कर्तृनाशनम् ।
शिवसृष्टिं विना ये तु[1] जायन्ते ब्रह्मणो मुखात् ।
ते सामान्या न तेषां तु परार्थेज्याधिकारिता ।
यदि मोहेन कुर्वीरन् राज्ञो राष्ट्रस्य नाशनम् ।

तत्रैव-

तस्मात् परार्थमात्मार्थं स्थापनं यजनं तथा ।
शिवविप्रेण कर्तव्यमन्येषां स्वार्थमेव हि ।
परार्थमपि कुर्याच्चेल्लोभेन नृपतिस्तदा[2] ।
तद्राष्ट्रस्य[3] विनाशः स्यादचिरेण न संशयः ।

तत्रैव-

विपरीतक्रियां दृष्ट्वाप्यौदासीन्यात् करोति यः ।
स राजा क्षयमाप्नोति नात्र कार्या विचारणा ।
तस्मादाचार्यवर्येण पञ्चगोचरवर्तिना ।
शैवागमपरिज्ञानपारगेण क्रियावता ।
क्रिया निर्वर्त्यमाना स्यात् स्वस्वराष्ट्राभिवृद्धये ।

---

[1] ये तु] अ, आ,उ ; येन- इ

[2] नृपतिस्तदा] आ, उ ; नृपतेस्तदा-अ, इ

[3] तद्राष्ट्रस्य] अ, इ; तद्राज्यस्य-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

तत्रैव-

शान्तिकं पौष्टिकं कर्म कार्यं राज्ञां[१] विशेषतः ।

अन्येषामपि सर्वेषामाभिचारादिकं तु वा ।

विधेयं धर्मानिष्ठेन[२] सान्तानिकवरेण[३] तु ।

तेनैवानुष्ठितं कर्म कामदं सर्वदा नृणाम् ।

तत्रैव-

आदिशैवेन कर्तव्या न चान्यैश्च विशेषतः ।

अन्यैश्चैव कृता चेत्तु निष्फला सा भवेत्तथा ।

तत्रैव –

आदिशैवस्य कर्तव्यमात्मार्थं च परार्थकम् ।

स्थापनं यजनं चैव[४] आदिशैवार्हकं भवेत् ।

अन्येन यत् कृतं कर्म आभिचारमिति स्मृतम्[५] ।

---

[१] राज्ञां] अ, इ, उ; राज्ञा-आ

[२] धर्मनिष्ठेन] आ, इ, उ ; धर्मानुष्ठेन-अ

[३] सान्तानिकवरेण] आ, उ ; सान्तानिकपरेण-अ, इ

[४] चैव] अ, इ; सर्वम्-आ, उ

[५] अन्येन यत् कृतं कर्म आभिचारमिति स्मृतम्] अ; कृतं तदन्यथा चेत्तु अभिचाराय चैव हि-आ ; अन्येन यत् कृतं कर्म आभिचारमिति स्मृतम् । कृतं तदन्यथा चेत्तु अभिचाराय चैव हि ।- इ ; अन्येषामपि सर्वेषामभिचारादिकं तु वा-उ

इतः परं

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

तत्रैव –

यथा गौरन्यवत्सस्य न सृजत्येव तद्रसम् ।

तत्सर्वप्रयत्नेन आदिशैवेन कारयेत् ।

स्थापनं यजनं चैव आदिशैवार्हकं भवेत् ।

अन्येन यत्कृतं कर्म आभिचारमिति स्मृतम् ।

आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनान्तकम् ।

अन्यथा कारयेद्यस्तु निष्फलं तदवाप्नुयात् ।

सुप्रभेदे-

चर्यापादे तु यन्नोक्तं सामान्यश्चेतवच्चरेत् ।

तच्च बोधायने सूत्रे दृष्ट्वा कर्म समाचरेत् ।

तस्माद्बोधायनेनोक्तं तेषां सूत्रमुदीरितम् ।

आदिशैवा इमे प्रोक्ताः संक्षेपान्न तु विस्तरात् ।

यथा गौर्निजवत्सस्य विसृजत्येव तद्रसम् ।

तस्मात् सर्वप्रयत्नेन आदिशैवेन कारयेत् ।

योगजे-

स्थापनं यजनं चैव आदिशैवार्हकं भवेत् ।

अन्येन यत् कृतं कर्म अभिचाराय तत् स्मृतम् । इति श्लोकद्वयं अ, इ मातृकयोर्न विद्यते ।

विधेयधर्मनिष्ठेन सान्तानिकवरेण तु ।

तेनैवानुष्ठितं कर्म कामदं सर्वदा नृणाम् । इति 'उ' मातृकायामेकः श्लोकः अधिकतया वर्तते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

योगजे-

आदिशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।
देशिकः स्थापकश्चैव[१] तस्य पर्यायवाचकाः ।
आदावेव तु शैवत्वादादिशैव इति स्मृतः ।
शिवेन दीक्षितत्वाच्च शिवब्राह्मण उच्यते ।
सर्वेषां तु गुरुत्वाच्च गुरुरित्यभिधीयते ।
देश आदिश्यते येन स देशिक इति स्मृतः ।
लिङ्गस्थापनयोग्यत्वात् स्थापको नाम कीर्तितः ।

तत्रैव-

आदिशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।
आदिशैवेन दीक्ष्याः स्युर्महाशैवानुशैवकाः ।
महाशैवं तु विप्राणां नृपाणामनुशैवकम् ।
वैश्यानां[२] भोगशैवं चान्तरशैवं तु शूद्रकम् ।
आदिशैवादिशैवानामादिशैवो गुरुर्भवेत् ।

कामिके –

आदिशैवकुले जातः श्रेष्ठः स्यात् स्थापनादिषु ।
विप्रादयश्चतुर्वर्णा अपि योग्याः स्वकर्मणि ।
दीक्षायां सर्वमर्त्यानां प्रतिष्ठायामथोत्सवे ।

---

[१] स्थापकश्चैव] आ, इ, उ ; साधकश्चैव-अ
[२] वैश्यानां] अ, आ ; मनुष्याणां- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

स्नपने प्रोक्षणेऽन्यत्र प्रायश्चित्तेऽभिषेचने ।

व्याख्यानादौ च युक्तः स्यात् स्वार्थे वाथ परार्थके ।

सर्वदेवार्चने चैव आदिशैवो गुरुर्मतः ।

मकुटे च –

चतुर्वर्णस्य दीक्षायां विशेषब्राह्मणो गुरुः ।

विप्रक्षत्रियविड्शूद्रा दीक्षिताश्च प्रवेशकाः ।

आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ।

ऊर्ध्वशैवेन कर्तव्यमात्मार्थं च परार्थकम् ।

ऊर्ध्वशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।

कारणे –

पञ्चशैवाः[१] समाख्याताः सिद्धान्ते तु प्रजापते ।

प्रथमोऽनादिशैवः स्यात् स शैवस्तु सदाशिवः ।

आदिशैवो द्वितीयस्तु शिवश्वेतः स[२] उच्यते ।

आदौ सदाशिवेनैव दीक्षितस्त्वादिशैवकः ।

कौशिकः काश्यपश्चैव भरद्वाजोऽथ[३] गौतमः ।

अगस्त्यश्चैव पञ्चैते पञ्चवक्रेषु[४] दीक्षिताः ।

---

[१] पञ्चशैवाः] अ, इ, उ; परशैवाः-आ

[२] शिवश्वेतः स] अ, इ, उ; शिवदीक्षित-आ

[३] भरद्वाजोऽथ गौतमः] अ, आ ; भरद्वाजः सगौतमः- इ

[४] पञ्चवक्रेषु] अ, इ, उ; पञ्चवक्रेण-आ

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MoE

कौशिकः शिवमूर्त्यां तु दीक्षितः शिवगोचरः[1] ।

काश्यपस्त्वीश्वरेणैव शिखागोचरसंस्थितः ।

ईशानेन भरद्वाजो दीक्षितो ज्योतिगोचरः ।

गौतमो ब्रह्ममूर्त्यां तु सावित्रीगोचरः स्मृतः ।

अगस्त्यश्चोर्ध्ववक्त्रेण दीक्षितो व्योमगोचरः ।

ऋषीणां चैव पञ्चानां गोचरं सम्प्रकीर्तितम्[2] ।

आदिशैवा इमे प्रोक्ता गोचरं कुलमुच्यते ।

कुलेष्वेतेषु संजाता स्थापनादिक्रियार्हकाः[3] ।

सदा प्रवर्तकास्त्वेते आदिशैवा इति स्मृताः ।

तृतीयस्तु महाशैवः स शैवो विप्र उच्यते ।

चतुर्थमनुशैवं च नृपवैश्यौ तु तौ स्मृतौ ।

पञ्चमोऽन्तरशैवस्तु स शूद्रश्चेति कथ्यते ।

शिवस्त्वनाश्रितः प्रोक्त आदिशैवस्तमाश्रितः ।

आदिशैवाश्रिताः प्रोक्ताः महाशैवानुशैवकाः ।

स्वायम्भुवे –

सिद्धान्तेषु समाख्याता पञ्चशैवाश्चतुर्मुख ।

अनादिशैवः प्रथमो ह्यादिशैवो द्वितीयकः ।

---

[1] शिवगोचरः] अ, आ, उ; शिवगोचरे- इ

[2] गोचरं सम्प्रकीर्तितम्] इ, उ ; गोचरत्वं प्रकीर्तितम्- अ, आ

[3] स्थापनादिक्रियार्हकाः] अ, इ, उ; स्थापनादिक्रियान्तकम्-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

तृतीयस्तु महाशैवश्चतुर्थश्चानुशैवकः ।

कृष्णस्त्वान्तरशैवः स्यात् प्रोच्यते तेऽधुना क्रमात् ।

स शिवोऽनाश्रितः प्रोक्तश्चादिशैवस्तमाश्रितः ।

आदित्वादादिशैवाश्च[१] दीक्षितास्त्वादिशैवकाः ।

महाशैवादयस्त्वन्ये[२] ते विप्राद्याः प्रवेशकाः ।

प्राप्ताः प्रविश्य[३] यस्मात्तु शिवतां चतुरानन ।

तस्मात् प्रवेशकेत्युक्ताः चाम्रलेपनताम्रवत् [४]।

प्रवेशकेति नामापि सामान्यं तेषु पद्मज ।

सुप्रभेदे –

मर्त्यानां मलनाशाय तेषां मुक्त्यर्थमेव च ।

परार्थपूजनार्थाय परेषां बोधनाय[५] च ।

स्थापनप्रोक्षणदीक्षाविधानकरणाय[६] च ।

ये शिवा निर्मितास्तेन शिवेन परमात्मना ।

---

[१] आदित्वादादिशैवाश्च] आ, उ ; अनाद्याद्यादिशैवाश्च-अ, इ

[२] महाशैवादयस्त्वन्ये] अ, इ; महाशैवादयस्तेषां-आ, उ

[३] प्राप्ताः प्रविश्य] अ, इ; प्राप्तःप्रवेशो-आ

[४] चाम्रलेपनताम्रवत्] उ ; चाम्रलेपनतवाम्रवत्-अ; चाञ्जलेः पतिताभवत्-आ; चात्रलेपनतवाम्रवत्- इ

[५] बोधनाय] आ, इ, उ ; शोधनाय-अ

[६] स्थापनप्रोक्षणदीक्षा°] इ ; स्थापनप्रोक्षणं दीक्षाविधानकरणाय-अ; स्थापनाप्रोक्षणादीक्षा°-आ,उ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

ते शैवा ब्रह्मवक्त्राच्च मर्त्यलोकं गताः क्रमात् ।
काश्यपादिकनामैश्च ऋषिरूपैश्च[१] कीर्तिताः ।
आदौ शिवत्वमस्तीति आदिशैवा उदीरिताः ।
शिवेन दीक्षिताः श्वेतास्ते[२] शिवब्राह्मणाः स्मृताः ।
सव्योमाः परमाचार्याः[३] विप्रोत्तमशिवोत्तमाः ।
द्विजोत्तमोत्तमाश्चैव शिवश्वेताः शिवात्मजाः[४] ।
तेषां पर्यायनामानि संक्षेपात् कथितानि ते ।

तत्रैव –

अनुशैवांस्तु वक्ष्येऽहं दीक्षिताः[५] ब्राह्मणास्त्विमे ।
अनुशैवाः क्रमेणोक्ता अन्तरांश्च ततः शृणु ।
क्षत्रियाद्यास्त्रयो वर्णाः शैवास्तेऽन्तरसंज्ञकाः ।
आदिशैवानुशैवैर्वा दीक्षा सम्पद्यते क्रमात् ।
एवमन्तरशैवानां लक्षणं च समासतः ।
तेषामन्तरशैवानामनुशैवो गुरुर्भवेत् ।
तेषां चैवानुशैवानामादिशैवो गुरुर्बवेत् ।

---

[१] ऋषिरूपैश्च] अ, आ ; ऋषिदेवैश्च- इ

[२] दीक्षिताः श्वेतास्ते] अ, आ,उ ; दीक्षिताश्वेतास्ते-इ

[३] सर्वोत्तमाः पराचार्याः] आ,उ ; सव्योमाः परमाचार्याः-अ, इ

[४] शिवात्मकाः] आ, इ,उ ; शिवात्मजाः-अ

[५] दीक्षिताः] अ, इ, उ; दीक्षितान्-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सर्वेषां गुरुरित्युक्तः शिवश्वेतः शिवात्मकः।

पूर्वं ब्रह्ममुखेष्वेव शिवश्वेतसमुद्भवः ।

ततः श्वेताः समुत्पन्नाः सामान्यश्वेतकाः[१] स्मृताः ।

शिवसृष्ट्या समुद्भूता ब्रह्मवक्त्रचतुष्टयात् ।

ये भूमौ ब्राह्मणा जातास्ते शिवब्राह्मणाः स्मृताः ।

शिवसृष्ट्या विना यस्माज्जायन्ते केवलं मुखात् ।

सामान्यब्राह्मणांस्तांस्तु दीक्षया प्रापयेच्छिवम् ।

तत्रैव –

ततस्तु दीक्षितान्[२] शिष्यान् ब्राह्मणादिक्रमेण तु ।

आचार्यलक्षणोपेतः शिवसिद्धान्तवित् सुधीः ।

आदिशैवः सुसंसृष्टः[३] सर्वेषां च गुरूत्तमः ।

वीरागमे –

विप्रक्षत्रियविड्शूद्रा दीक्षिताश्चापि देशिकैः ।

आत्मार्थयजनं कुर्युर्न कर्तव्यं परार्थकम् ।

योगजे-

विप्रक्षत्रियविड्शूद्रा दीक्षिताश्चापि पूजकाः ।

आत्मार्थयजनं कुर्यान्न कुर्यात्तु परार्थकम् ।

---

[१] सामान्यश्वेतकाः] इ,उ ; सामान्यश्वेतजाः-अ; सामान्याः श्वेतजाः-आ

[२] ततस्तु दीक्षयेत्] उ ; ततः स दीक्षितान्-अ, इ; ततः स दीक्षयेत्-आ

[३] सुसंहृष्टः] आ, उ ; सुसंसृष्टः-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सूक्ष्मे-

आत्मार्थं च परार्थं च द्विविधं यजनं स्मृतम् ।
शिवव्रतद्विजादीनामात्मार्थं तु प्रशस्यते ।
आर्यदेशोद्भवस्योक्तं शिवद्विजस्य परार्थकम् ।

कारणे -

महाशैवानुशैवाश्च तथैवान्तरशैवकाः ।
आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ।

सुप्रभेदे –

दीक्षितानां द्विजादीनामात्मार्थमनुलोमिनाम् ।
परार्थमादिशैवानामात्मार्थं च समर्चनम् ।

तत्रैव –

अथातः सम्प्रवक्ष्यामि आचार्यस्य तु लक्षणम् ।
फलपाकविधिं ज्ञात्वा शिवभक्तिर्भवेद्यदा ।
तदा प्रवर्तते पुंसो लिङ्गसंस्थापने रतिः ।
आचार्यं पूर्वमन्विच्छेन्मूर्तिपांस्तदनन्तरम् ।
आदिशैवकुलोद्भूतः पञ्चगोचरसंस्थितः ।
सर्वशास्त्रार्थतत्त्वज्ञः शिवज्ञानविशारदः ।
ईदृग्भूतस्तु यो विद्वान् स्थापनादीनि कारयेत् ।
स एव स्थापको वत्स नेतरः सर्वधा[1] विभोः ।

---

[1] सर्वधा] अ, इ, उ; सर्वथा-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

अनुशैवादिभिर्नैव स्थापनादीनि कारयेत् ।

कर्मणाम्[१] आदिशैवस्य कर्तव्यं स्थापनादिकम् ।

अन्यथा तु कृते[२] राज्ञस्त्वभिचारकमेव तत् ।

न तद्गृह्णीत देवेशो[३] न फलं जायते यतः ।

तत्रैव –

आदिशैवाङ्गकैर्युक्तान् विधिज्ञान् मन्त्रसंयुतान् ।

शिवव्रतधरान् मुख्यान् शैववेदविशारदान् ।

शतमष्टोत्तरं वापि आदिशैवान् प्रगृह्य च ।

स्थापनादिक्रियाः सर्वास्त्वादिशैवेन कारयेत् ।

दीक्षामाज्ञां च सर्वेषां कारयेद्विधिचोदितः ।

कामिके –

गुरुर्मूर्तिधरैः सार्धं होमकर्म समारभेत् ।

पूर्वोक्तभूषणोपेतस्त्वादिशैवकुलोद्भवः ।

तत्रैव गौरीकल्याणपटले –

शिवद्विजकुलोद्भूतः समधीतशिवागमः ।

सोष्णीषश्चोत्तरीयश्च धृतः सर्वाङ्गलक्षणः ।

ध्यात्वोद्धृत्योदकं दद्यात् कराभ्यां करकेण च ।

---

[१] कर्मणाम्] सम्पादकीयः पाठः ; कर्मिणाम्-अ, इ; कर्मणा-आ,उ

[२] तु कृते] अ, इ, उ; कुरुते -आ

[३] न तद्गृह्णीत देवेशो] अ, आ ; न तद्ग्राही तदेवेशो- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

तत्रैव शताभिषेकपटले –

ब्राह्मणं क्षत्रियं वाथ वैश्यं शूद्रमथापि वा ।

अनुलोमसमुद्भूतं विशेषात् भूपतिं द्विजाः ।

राजस्त्रियं वा सामन्तममात्यं वा पुरोहितम् ।

तत्तज्जातिसमुद्भूतां[1] स्त्रियं वा शिवविप्रजः ।

पञ्चाङ्गभूषणोपेतस्त्वभिषेकं समाचरेत् ।

तत्रैव –

स्नात्वा समाप्य सन्ध्यां तु[2] कृतनित्यो गुरूत्तमः ।

पञ्चगोचरसंजातः सोष्णीषः सोत्तरीयकः ।।

पञ्चाङ्गभूषणोपेतो दक्षिणाहृष्टमानसः[3] ।

तत्रैव नैमित्तिकपूजापटले –

उपयुक्तं महद्द्रव्यं यागे स्वर्णाम्बरादिकम् ।

आचार्यायैव दातव्यं पञ्चगोचरवर्तिने ।

स्वायम्भुवे –

योगपूजाविधानज्ञः शिवद्विजकुलोद्भवः ।

पूजां कृत्वा तु विधिवन्नटेशस्य विशेषतः ।

सुप्रभेदे –

---

[1] तत्तज्जातिसमुद्भूतां] अ, इ,उ; तत्तज्जातिसमुद्भूतं-आ

[2] सन्ध्यां तु] आ, उ ; सन्ध्याद्याः-अ; सन्ध्या . . . . - इ

[3] दक्षिणाहृष्टमानसः]अ, आ,उ ; दक्षिणाहृष्टमानसः- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

आचार्य आदिशैवस्तु सकलीकृतविग्रहः ।

पुण्याहं वाचयित्वा तु प्रोक्षयेत् पञ्चगव्यकैः ।

कर्षयेच्छिवमन्त्रेण प्रागुदक् प्रवणां महीम्[1] ।

कामिके –

यस्य राष्ट्रे[2] शिवज्ञानव्याख्यानं वर्तते द्विजाः ।

तद्राष्ट्रं वर्धते नित्यं स नराधिप ऊर्जितः ।

राज्ये राजगुरुत्वे च सेनापत्ये[3]ऽन्यकर्मणि ।

पुरोहितत्वे सर्वस्य राजकार्यस्य दर्शने ।

शुद्धशैवो भवेद्योग्यः स चेत् सान्तानिकेश्वरः ।।

तत्रैव –

सृष्ट्यनन्तरकाले ये दीक्षिताः कौशिकादयः ।

शिवेन तत्कुलोत्थाः स्युः शैवाः सान्तानिका द्विजाः ।

सान्तानिकाश्च विज्ञेयाः सर्वानुग्राहका मताः ।

चीर्णचर्याव्रतास्ते वा तद्वियुक्तास्तु वा मताः ।

शिवद्विजकुलोत्था ये ते वै माहेश्वरा जनाः ।

वीरतन्त्रे –

---

[1] प्रागुदक्प्रवणां महीम्] सम्पादकीयः पाठः ; प्रागुक्तप्रणवान्महीम्-अ;
प्रागुदक्प्रणवां महीम् –आ, इ, उ

[2] राष्ट्रे] आ, उ ; राज्ञः-अ, इ

[3] सेनापत्ये] अ, इ, उ; सैनापत्ये-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवद्विजास्तु विप्रेन्द्रा आदिशैवा इति स्मृताः ।
कौशिकः काश्यपश्चैव भारद्वाजोऽत्रिरेव च ।
गौतमश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
तेषामृषीणां विप्रेन्द्र जातानां च पुनःपुनः ।
शिवद्विजानां दीक्षां तु[1] न कुर्वीत कदाचन ।
मदर्चनार्थं तेषां च दीक्षा शुद्ध्यर्थमिष्यते ।

कामिके –

उत्सवाद्यङ्गक्लृप्तिं च देवतावाहनादिकम् ।
तत्काले मूललिङ्गादिपूजनं नित्यहोमकम् ।
अनेकनरनिर्वर्त्यं कथमेकः करोत्यहो ।
साधु पृष्टं महाप्राज्ञाः समाधिं कथयाम्यहम् ।
नित्यनैमित्तिके काम्ये यत्कर्मैकालयस्थितम्[2] ।
एकाचार्येण कर्तव्यमिति साधूदितं मया ।
देशिकस्यास्य पुत्रो वा पौत्रो वा तस्य बान्धवः ।
तद्दीक्षितास्तदादेशभयाविष्टाश्च ये नराः ।
आदिशैवकुले जाताः ब्राह्मणाः क्षत्रिया विशः ।
शूद्रा ये वानुलोमास्ते गन्धर्वा नर्तकादयः ।
रुद्रकन्याश्च मद्दास्यस्तदाज्ञापालका यदि ।

---

[1] दीक्षां तु] आ, इ, उ ; दीक्षादौ-अ

[2] यत्कर्मैकालयस्थितम्] अ, इ, उ ; यत्कर्मैकं समास्थितः-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

तैरप्यनुष्ठितं कर्म देशिकानुष्ठितं भवेत् ।

सूक्ष्मे –

आदिशैवेन कर्तव्यं प्रतिष्ठास्थापनादिकम् ।

अनुशैवादयः सर्वे आत्मार्थविषये क्रमात् ।

समयी पुत्रकश्चैव साधको मूर्तिधारकः ।

गुरोराज्ञावशात् कुर्याद्दिशान्तरगतो यदि ।

योगजे –

भवेत् कर्मान्तरे विघ्न आचार्येऽप्यगुणे यदि ।

तस्य पुत्रेण शिष्येण कर्तव्यं तदनुज्ञया[१] ।

कारणे –

गुरुणाकरणस्यैव विरोधे सति तत्र तु ।

सा क्रिया तस्य शिष्येण कर्तव्या तेन शास्त्रतः[२] ।

कामिके –

शिवाश्रितस्य तत्प्रोक्तं ब्राह्मणस्य शिवागमे ।

क्षत्रियादित्रयाणां च नार्चनं तु परार्थकम् ।

कामिके –

तस्मात् परार्थमात्मार्थं स्नपनं यजनं[३] तथा ।

---

[१] कर्तव्यं तदनुज्ञया] अ, इ, उ; कर्तव्या तेन शास्त्रतः-आ

[२] कारणे इत्यारभ्य तेन शास्त्रतः इति पर्यन्तं 'आ' मातृकायां न विद्यते ।

[३] स्नपनं यजनं] आ, उ ; आत्मार्थस्नपनं-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवविप्रेण कर्तव्यमन्येषां स्वार्थमेव हि ।
परार्थमपि कुर्याच्चेल्लोभेन नृपतेस्तदा ।
तद्राष्ट्रस्य विनाशः स्यादचिरेण न संशयः ।

वीरतन्त्रे –

आदिशैवकुले जातः स वै देशिक उच्यते ।
आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनान्तकम् ।
अन्यथा कारयेद्यस्तु अभिचाराय चैव हि ।

तत्रैव –

तेषामृषीणां वंशेषु जाता ये तु शिवद्विजाः ।
पुनर्दीक्षां न कुर्वन्ति कर्तव्या चेत्तु निष्फला ।

कारणे –

उत्सवं कारयेत् पश्चाद्यावत् सप्तदिनावधि ।
एकाहमुत्सवं वापि कारयेद्देशिकोत्तमः ।
आरम्भादान्तमेवं तु एकदेशिकता भवेत् ।
आचार्यस्य अभावे तु मूर्तिपेन तु कारयेत् ।
यागोपकरणं सर्वं देशिकाय प्रदापयेत् ।

अन्यत्र –

आदिशैवान्वयोद्भूतः शिवदीक्षाभिषिक्तकः ।
पञ्चगोचरसम्भूतः शैवानुष्ठानतत्परः ।
ईदृशं गुरुमासाद्य प्रणयेत् स्थापनादिकम् ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

मूर्तिपास्तादृशाः प्रोक्ताश्चानयेद्धोमकर्मणि ।

कामिके –

सिद्धान्तशास्त्रतश्चैव शिवविप्रैर्यथाक्रमम् ।

शास्त्रान्तरैश्च यत् स्थाप्यं लिङ्गं तदुभयात्मकम् ।

पूजनीयं नृपग्रामयजमानाभिवृद्धये ।

शैवः सर्वाधिकारी स्यात् स्वकीये च परत्र च ।

शैवाः सर्वेषु कुर्वन्ति ये गृहस्था द्विजोत्तमाः ।

यामले मातृतन्त्रे च कापाले पाञ्चरात्रके ।

बौद्धे चार्हते चैव लागुडे वैदिकेऽपि च ।

अन्येष्वपि च मार्गेषु तत्तच्छास्त्रोक्तमार्गतः ।

शैवाः कुर्वन्ति दीक्षाद्यं तल्लिङ्गस्थापनादिकम् ।

तदेवं सान्तानिकशिवद्विजाः सर्ववर्णपूज्यानां संन्यासिनामपि पूज्या इति शिवागमपुराणेषु श्रवणात् । तदुक्तं मकुटोत्तरे-

कृतबुद्धिषु कर्तारस्तेभ्यः संन्यासिनोऽधिकाः ।

संन्यासिभ्यो महर्षिभ्यो ऽपि[1] श्रेष्ठाः शङ्करपूजका[2] । इति ।

प्रोक्तपञ्चर्षिगोत्रसम्भवसान्तानिकविशेषशिवद्विजव्यतिरिक्ताः सामान्यविप्रसङ्करशिवद्विजाः सम्भवन्ति । इति क्वचित् पुराणान्तरादिके

---

[1] महर्षिभ्यो ऽपि] उ ; महात्मभ्यः-आ, इ

[2] श्रेष्ठाः शंकरपूजकाः] आ, उ ; महाश्रेष्ठास्तेषु-इ ; संन्यासिभ्यो महद्भ्योपि श्रेष्ठः शंकरपूजकः-इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

ज्ञेयम् । तदित्थं शिवद्विजमाहात्म्यप्रसङ्गेन शिवद्विजव्यतिरिक्तानां शिवदीक्षितानां महाशैवब्राह्मणादीनाम् अदीक्षितानां ब्राह्मणानां[1] च परार्थपूजानिषेधवचनानि प्रदर्शितानि। तथापि क्वचित् सुप्रभेदाजितागमादिके कथञ्चिद्भक्तिप्रकर्षाकृष्टविधे शिवदीक्षितानां महाशैवानां परार्थपूजा प्रतिपादिता ।

यथा सुप्रभेदे –

दीक्षया प्रापिता यस्मादनुशैवास्तु कीर्तिता इत्युपक्रम्य

स्वार्थं वाऽथ परार्थं वा पूजयेत्तु विशेषतः ।

अजिते –

शिवाश्रितस्य तत्प्रोक्तं ब्राह्मणस्य शिवागमे ।

क्षत्रियादित्रयाणां च नार्चनं तु[2] परार्थकम् ।

हालास्यमाहात्म्ये –

दीक्षाविहीना विप्राश्च महालिङ्गस्य तस्य तु ।

अर्चनायाम्[3] अनर्हाश्च क्षत्रियाद्याश्च[4] दीक्षिताः ।

ते सर्वे कारयामासुरन्यैरन्यैस्तु भूसुरैः ।

अन्यत्र –

---

[1] महाशैवब्राह्मणादीनामदीक्षितानां ब्राह्मणानां] इ, उ ; ब्राह्मणानां- आ

[2] नार्चनं तु] अ, इ, उ; नार्चनायां-आ

[3] अर्चनायाम्] अ, इ, उ; अर्हणायाम्-आ

[4] क्षत्रियाद्याश्च] आ, उ ; क्षत्रियाश्चापि-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

तन्मध्ये ये[१] पुनर्दीक्षां शैवीमासाद्य पूजकाः ।

कर्तुमात्मपरार्थं ते पूजामर्हन्ति वै द्विजा । इति ।

ततोऽयमत्र विवेकः –

वैदिकी शैवी चेति पूजा द्वेधा । तत्र शैवी परार्थपूजा वैदिकेषूक्ता यद्यपि प्रोक्तप्रकारेण परिपाकदीक्षामुमुक्षुविषयाप्यर्चनाङ्गशिव-दिक्षितानामेव । महर्षिमहाशैवानां केवलं वैदिकी परार्थपूजा च । केवलं वैदिकानां बोधायनसूत्रोक्तप्रकारेण कर्तव्या यद्यपि शिवा-गमोक्तशिवदीक्षाविधुरत्वेनादीक्षितानां वैदिकपाशुपतादिषूक्तप्रकारेण कथञ्चित् शिवदीक्षितानामेव । सर्वथा नादीक्षितानां कर्षणादि-प्रतिष्ठान्तोत्सवादिप्रायश्चित्तान्तकर्मणां शिवागमसापेक्षत्वेन अदीक्षितानां शिवागमेष्वनधिकारात् । तत्सापेक्षत्वं च वेदोपबृंहणे सूतसंहितादिपुराणे प्रोक्तम् ।

आगमेनैव शास्त्रेण प्रोक्तलक्षणलक्षितम् ।

आदाय श्रद्धया[२] विप्राः शिवलिङ्गं समाहिताः ।

ब्रह्मोत्तरखण्डे –

आगमोक्तेन विधिना पीठमामन्त्रयेत् सुधीः ।

स्मृतौ च –

केचिद्वेदविदश्चापि तान्त्रिकेणाध्वना सुरान् ।

---

[१] ये] आ, उ ; वै-अ, इ

[२] आदाय श्रद्धया] इ, उ ; आदावश्रद्धया- अ, आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अभ्यर्च्य सिद्धिमायान्ति काङ्क्षन्तश्च[1] ततः फलम् ।

तथैव वैदिकपरार्थमीमांसायां श्रीमदापदुद्धारणदीक्षितैरपि शिवागम-शिवदीक्षासापेक्षत्वं साधितम्[2] । प्रधानप्रकृष्टकर्माधिकारिभिः साकल्येन प्रवृत्ते सत्यप्रधानेन तथाभूतं कर्म न कार्यम् । तथा कृतं कर्म प्रोक्तसर्वदोषकृत् । तथा मीमांसान्यायाच्च पूजासु शिवतान्त्रिकीपूजा मुख्या । तत्र मुख्याधिकारिणां शिवब्राह्मणानामभावे वैदिकेन वैदिकीं शिवपूजां कथञ्चिद्राजा कारयेत् । वैदिकपरार्थपूजा-प्रकारश्च पौराणिकः प्रोल्लिख्यते ।

कलिदोषेण मर्त्यानां महामोहो भविष्यति ।
वेदमार्गरतिः [3]शुद्धा न भविष्यति सर्वधा ।
वेदबाह्येषु मार्गेषु श्रद्धां कुर्वन्ति सन्ततम् ।
अल्पायुषो भविष्यन्ति दरिद्राश्च विशेषतः ।
आधिव्याध्यस्त्रशस्त्राद्यैर्व्याघ्रचोरादिभिस्तथा।
पीडिताश्च भविष्यन्ति भूतप्रेतादिभिस्तथा[4] ।
त्यक्तवर्णाश्रमाचारा नष्टोपायविशेषतः ।
भूयो भूयो भविष्यन्ति विवशाः सर्वयोनिषु ।

---

[1] काङ्क्षन्तश्च] अ, आ, उ ; काङ्क्षितं च-इ
[2] साधितम्] आ, इ, उ ; सूचितम्-अ
[3] शुद्धा] अ, इ, उ; शुद्धिः-आ
[4] अयमर्धश्लोकः इ, उ मातृकयोरेव दृश्यते ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

मामुक्तलक्षणं साम्बं राजराष्ट्रविवृद्धये ।
प्रतिष्ठाप्य नदीतीरे प्रणवेनैव केवलम् ।
गन्धपुष्पादिभिर्दिव्यैः सार्वभौमो भवेद्ध्रुवम् ।
विचित्रमालयं कुर्यात् प्राकारैर्गोपुरैर्युतम् ।
नृत्तगीतादिकं दद्यात् त्रिसन्ध्यं शुद्धमोदनम् ।
षण्मुखं वायुकोणे च नैर्ऋते च विनायकम् ।
स्थापयित्वार्चयेन्नित्यं राजराष्ट्राभिवृद्धये ।
द्विजैराराधनं कार्यं राजराष्ट्राभिवृद्धये ।
राजा विजयमाप्नोति तत्रैव मम पूजनात् ।
आयुरारोग्यसम्पन्नो भवेन्मुक्तो भविष्यति ।
शत्रवश्च विनश्यन्ति देवि[1] राज्ञो न संशयः ।
धनधान्यसमृद्धं स्यात् राष्ट्रं सर्वत्र सर्वदा ।
काले कालेऽभिवृद्धिः स्यात् सर्वत्र मम पूजया ।
वर्णाश्रमसमाचारनिरताः सर्वमानवाः ।
भविष्यन्ति न सन्देहस्तत्र मामर्चयेत्ततः । इति ।

तदेवं शिवब्राह्मणव्यतिरिक्तब्राह्मणानामपि कथञ्चित् परार्थपूजा भाषितापि गौणवृत्तयेति मन्तव्या ।

॥ इति शिवाचार्यमाहात्म्यं समाप्तम् ॥

---

[1] देवि] अ, आ, उ ; देव- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

अथ चातुर्वर्ण्यशैवाचार्यविधिरुच्यते ।

तदुक्तं शैवपुराणे-

शिवशास्त्रसमायुक्ताः पशुशास्त्रपराङ्मुखाः ।

ब्राह्मणादिचतुर्वर्णा आचार्यास्तु प्रकीर्तिताः ।

कामिके –

स्वार्थेष्टौ चललिङ्गस्य प्रतिष्ठायां त्रयस्त्विमे ।

शूद्रोऽपि शूद्रदीक्षायां स्वार्थे च चलसंज्ञके । इति ।

सुप्रभेदे –

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धकुलोद्भवाः ।

आचार्यास्ते तु विज्ञेया नान्येषां तु कदाचन । इति ।

तत्रैव जातिनिर्णये –

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव प्रकीर्तिताः ।

एतेषां चातुर्वर्णानामाचार्यत्वं नियोजयेत् । इति ।

सर्वज्ञानोत्तरे –

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः शुद्धास्तु साधकाः ।

स्ववर्णाद्यानुपूर्व्येण आचार्याश्च षडानन । इति ।

चिन्त्यविश्वे –

विप्रादिषु चतुर्ष्वेवमनुलोमादिषट्सु च ।

एतेषां दशजातीनामाचार्यत्वं विधीयते । इति ।

श्रीपराख्ये-

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सर्ववर्णान्वितो विप्रः क्षत्रियस्त्रितयं गुरुः ।

वैश्यशूद्रौ द्वयं[1] चैकं दीक्षयेत् तत्क्रियार्थवित् ।

ब्राह्मणः सर्वजातीनां सदानुग्राहकः स्मृतः ।

स्वजातिपूर्वमाचार्यास्त्रयः शेषा नृपादयः । इति ।

तथा षड्वहस्त्रिकायाम् –

चतुर्णामपि वर्णानामाचार्यत्वमिहोदितम् ।

ब्राह्मणादिचतुष्कस्य[2] द्विजोऽनुग्राहकृन्मतः ।

त्रयाणां क्षत्रियो द्वाभ्यां वैश्यः शूद्रः स्वयोनिजे ।

एवं चानुग्रहः कार्यश्चतुर्भिरपि देशिकैः । इति ।

किरणे गरुडः –

मध्ये वर्णचतुष्कस्य गुरुत्वं कस्यचिद्वद ।

ईश्वरः –

चतुर्णामपि वर्णानामाचार्यत्वमिहोदितम् ।

ब्राह्मणादिचतुष्कस्य[3] द्विजोऽनुग्राहकृन्मतः ।

त्रयाणां क्षत्रियो द्वाभ्यां वैश्यः शूद्रः स्वयोनिजे । इति ।

पुनः कामिके च –

नित्यादित्रितयं कार्यं चतुर्भिरविचारतः ।

---

[1] वैश्यशूद्रौ द्वयं] अ, इ, उ; वैश्यः शूद्रद्वयं-आ

[2] ब्राह्मणादिचतुष्कस्य] अ, उ; सर्वेषामपि वर्णानां-आ ; सर्वेषां चैव वर्णानां- इ

[3] ब्राह्मणादिचतुष्कस्य] अ, उ; मध्ये वर्णचतुष्कस्य-आ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

वैश्वदेवं तथा सन्ध्यां शूद्रस्त्यक्त्वा त्रयीमयीम् । इति ।

कालोत्तरे –

अभिषिक्तोऽयमेवं हि ब्राह्मणः क्षत्रियोऽथवा ।

वैश्यो वाप्यथ शूद्रो वा प्रतिष्ठाद्यधिकारिणः ।

ननु चतुर्थविषयगुरुत्वप्रतिपादकप्रदर्शितवचनानां नैष्ठिकशूद्रविषयत्वमस्तु । न तु गृहस्थविषयत्वम् । तदुक्तं कामिके –

शूद्रोऽपि शूद्रदीक्षायां स्वार्थे च चलसंज्ञके ।

बाणलिङ्गे क्षणे वापि स्थापको यदि नैष्ठिकः ।

शूद्रस्यापि गृहस्थस्य नित्येष्टावेव योग्यता ।

अभिषेकेऽप्ययोग्योऽयं किं पुनः स्थापनादिषु । इति ।

सत्यं श्रोतुरभिप्रेताधीनमिदं वचनं क्वाचित्कम् । अन्यथापि भूयसामिति न्यायादपार्थकमेव । तथा च वाक्यविदः –

विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् सधर्मत्वं लौकिके ।

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।

ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ।

इत्यादिपुराणविप्रतिपत्तिपरिहारे तत्रभवता स्कान्दरातेनाप्युक्तोऽयं न्यायः -- आर्षेण वा विप्रतिषिद्धम् आर्यं[१] युक्तेन[२] नेतव्यम् अयुज्यमानं[३]

---

[१] आर्यं] अ, इ, उ; आर्षं-आ

[२] युक्तेन] अ, आ, उ ; संयुक्तेन-इ

[३] अयुज्यमानं] अ, आ, उ ; युज्यमानं-इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

नेतव्यमल्पं बहुना तथैव सतां प्रवृत्त्या पृथक् न[१] चान्यदिति । शूद्रगृहस्थानां गुरुत्वं[२] सिद्धमेव । नैष्ठिकस्त्वधमो ज्ञेय इत्यादिनैष्ठिकस्याधमत्ववचनमप्युक्तन्यायेन परिहरणीयम् । तदुक्तं पराख्ये –

गृहस्थः सर्ववर्णेषु श्रेष्ठो गुरुरुदाहृतः ।
नैष्ठिकस्त्वधमो ज्ञेयो भौतिकस्तु विशेषतः । इति ।

कालोत्तरे –

चतुर्णामपि वर्णानां लिङ्गिनां गृहिणामपि ।
आचार्यत्वं शिवेनास्मिन् सिद्धान्ते प्रतिपादितम् । इति ।

उत्तरकामिके –

चातुर्वर्ण्यगृहस्थानामाचार्यत्वं विशेषतः ।
अथवा ब्रह्मचारीणामाचार्यत्वं विशेषतः । इति ।

षड्वहस्त्रिकायाम् –

श्रृणु षण्मुख तत्त्वेन भोगमोक्षौ यथास्थितौ ।
ब्रह्मचारी गृहस्थश्च द्विविधो देशिकोत्तमः ।
दीक्षाप्रतिष्ठयोरेतावुभावप्यधिकारिणौ ।
किन्तु मोक्षैकयुक्तानां विभूतिविमुखात्मनाम् ।

---

[१] पृथक् न] इ ; पथिकेन- अ, आ, उ

[२] गुरुत्वं] अ, इ, उ ; अगुरुत्वं-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

ब्रह्मचारी गुरुर्ज्ञेयो गृहस्थश्चोभयार्थिनाम्[१] ।

गृहस्थादितरेषां तु नास्ति भोगाधिकारिता ।

तस्माद्गृही गुरुः कार्यो भोगमोक्षोभयार्थिभिः । इति ।

तथा सन्ताने –

गृहस्थश्चोत्तमो विद्यात् ब्रह्मचार्यधमो भवेत् । इति ।

सुप्रभेदे –

गृहस्थश्चोत्तमो ज्ञेयो भौतिकब्रह्मचार्यपि । इति ।

वीरतन्त्रे –

गृहस्थमुत्तमं विद्यादथवा ब्रह्मचारिणम् ।

सान्तानिकगृही श्रेष्ठो गृहस्थस्तदभावतः ।

भौतिको ब्रह्मचारी वा देशिको गृहमेधिनाम् ।

नैष्ठिको नैष्ठिकेषु स्यात् भुक्तौ मुक्तौ क्रमान्मतः । इति ।

किरणे –

सान्तानिको गुरुः प्रोक्तो गृहस्थो देशिकोत्तमः ।

गृहस्थं चोत्तमं विद्यादथवा ब्रह्मचारिणम् ।

गृहस्थो देशिकः श्रेष्ठो भोगमोक्षप्रसिद्धये । इति ।

कामिके –

सृष्ट्यनन्तरकाले ये दीक्षिताः कौशिकादयः ।

शिवेन तत्कुलोत्थाः स्युः शैवाः सान्तानिका द्विजाः ।

---

[१] उभयार्थिनाम्] आ, उ ; उभयात्मनाम् –अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सान्तानिकगुरुः श्रेष्ठो गृहस्थस्तदभावतः ।

भौतिको ब्रह्मचारी वा देशिको गृहमेधिनाम् ।

नैष्ठिको नैष्ठिकेषु स्यात् भुक्तिमुक्तिक्रमान्मतः ।

भुक्तिमुक्तिप्रसिद्ध्यर्थं गृहस्थो गुरुरिष्यते । इति ।

तत्रैव –

महापुरस्य सौम्यायामभिषिञ्चेद्द्विजानथ ।

पूर्वायां क्षत्रियान् ब्रह्मन् वैश्यान् दिशि यमस्य तु ।

शूद्रांस्तु पश्चिमाशायां सर्वान् वा ऐशदिक्स्थितान् । इति ।

सर्वलक्षणहीनोऽपि ज्ञानवान् गुरुरिष्यते ।

वर्णावर्णविचारो यः स नरः पातकी भवेत् । इति ।

॥ इति चातुर्वर्ण्यशैवाचार्यमाहात्म्यं समाप्तम् ॥

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

चातुर्वर्ण्यसंन्यासविधिः

चिन्त्यविश्वे-

यतयस्त्रिविधा ज्ञेयास्तपस्वी विदुषस्तथा ।
विद्वानिति त्रिधा प्रोक्तास्तेषां लक्षणमुच्यते ।
तपोनिष्ठस्तपस्वीति तस्य वृत्तिस्तु सुव्रत ।
नाध्येतव्यं न सङ्कल्पो न श्रोतव्यं कदाचन ।
शिष्याणां सङ्ग्रहं[1] चैव नैव विद्याप्रकाशनम्[2] ।
न वदेत् संस्कृतां भाषां न दण्डी न कमण्डलुः ।
लिङ्गं क्षणिकमभ्यर्च्य भक्तिमात्रेण संयुतः ।
एकाकी वृक्षमूले वा वने वा जनवर्जिते ।
जनाद्भीतिसमायुक्तो वसेद्बाहूपधानकः ।
वसनं येन केनापि तथैवाशनपानकम् ।
पाणिपात्रोदरोपानो याचितान्नेन जीवनम् ।
इत्युक्तस्तु तपस्वी स्यात् साधको याति नामवान् ।
विदुषोश्च यतेर्वापि वर्तनं नन्दिकेश्वर ।
अध्यापनं चाध्ययनं श्रवणं चिन्तनं तथा ।
एतच्चतुष्टयं तस्य विदुषोश्च विशेषतः ।
विद्वद्यतेर्विशेषोऽस्ति व्याख्यानं चिन्तनं भवेत् ।

---

[1] संग्रहं] अ, इ, उ ; सुग्रहं-आ

[2] विद्याप्रकाशनम्] आ, उ ; विद्याप्रकाशकः-अ, इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सदाचार्याभिषेकेण युक्तो विद्वत्समाख्यकः ।

यतीनां त्रिविधं प्रोक्तं शैवानां चतुराश्रमे ।

आश्रमाणां च भेदोऽस्ति निष्ठाभेदो न विद्यते ।

एकः फलद्वयं भुङ्क्ते मोक्षः साधारणस्तयोः ।

सूतसंहितायां किरणादिके च भङ्ग्यन्तरेण नामानि वृत्तानि खनन-दहनव्यवस्थादीनि च द्रष्टव्यानि ।

सुप्रभेदे –

ब्राह्मणादिचतुर्वर्णाः काश्यपादिसमुद्भवाः ।

परमेशप्रसादेन अधिकारे नियोजिताः ।

गोचरं गोत्रसूत्रं च संक्षेपेण वदाम्यहम् ।

गोचरं शिवचिह्नं हि गोत्रं स्वमुनिवर्गकम् ।

सूत्रमाचारमेवं हि शैवानामुच्यते क्रमात् ।

शिवः शिखा तथा ज्योतिः सावित्री चेति गोचराः ।

एतच्चतुर्थनामानि शैवानां शिवशासने ।

गोचरं कुलमित्युक्तं तच्चिह्नं च चतुर्विधम् ।

काश्यपः कौशिकश्चैव भारद्वाजोऽथ गौतमः ।

एते चतुर्विधा ज्ञेयाः सम्प्रोक्ता मुनयस्त्विह ।

व्रतं हि द्विविधं प्रोक्तं सामान्यं च विशेषतः ।

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।

चतुराश्रम एवं हि सामान्यविधिचोदितम् ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

चतुर्णां गोचराणां तु सममेतच्छिवागमे । इति ।

कालोत्तरे च –

शिवः शिखा तथा ज्योतिःसादित्रीति चतुष्टयम् ।

शैवं कुलं शिवाज्जातं शक्तेर्जातं शिखाकुलम् ।

बिन्दोर्ज्योतिष्कुलं जातं नादात् सावित्रमेव च ।

दीक्षाकाले यदा मन्त्रो लीयते च शिवादिषु ।

तत्तद्वारवशाज्जातं क्रमात् कुलचतुष्टयम् ।

क्रमादेतत्तु विज्ञेयं ब्राह्मणादिचतुष्टये ।

शुद्धजात्युदये नश्येत् प्राकृतं यत् कुलं स्थितम् ।

कृतयुगे ब्राह्मणसंन्यासी श्रेष्ठः । त्रेतायुगे क्षत्रियसंन्यासी च श्रेष्ठः । द्वापरयुगे वैश्यसंन्यासी श्रेष्ठः । कलियुगे शूद्रसंन्यासी श्रेष्ठः । इत्यादिकं ब्रह्माण्डपुराणादिके विद्यमानं द्रष्टव्यम् ।

ननु सर्वज्ञानोत्तरे –

द्वावेश्रमिणौ शैवे गृहस्थब्रह्मचारिणौ ।

लोकानुग्रहकर्तारौ परिव्राट् तापसौ न हि ।

कालोत्तरे –

वानप्रस्थयतीनां तु गुरुत्वं नेष्यते सदा ।

सुप्रभेदे –

भावद्रव्याग्निसंत्यागादेते संन्यासिनो यदा ।

दीक्षास्थापनयोस्तस्मादेते नैवाधिकारिणः । इत्यादिनिषेधवचनात् कथं

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

कथयन्ति संन्यासिनां गुरुत्वमिति चेत्, सत्यम् । आणवीनाम[1] क्रियादीक्षां विना शाक्तीति शाम्भवीति दीक्षा द्विविधा । तस्यां ज्ञानवतीदीक्षायां कथञ्चित् क्वाचित्कं गुरुत्वमस्त्येव । तदुक्तं संन्यासदीपिकायाम् –

परहंसयतीनां च तपःसंन्यासिनां च यौ ।
अनयोरग्निकार्येषु योग्यत्वं न विधीयते ।
होमं विना तयोरेवमभिषेकं विधीयते ।

॥ इति शैवसंन्यासविधिः समाप्तः ॥

[1] आणवीनाम] अ, इ, उ; आणवीनां-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवपूजाधिकारविधिः

रौरवे –

श्वेतवर्णं भवेद्विप्रे क्षत्रिये रक्तवर्णकम् ।

पीतवर्णं भवेद्वैश्ये कृष्णवर्णं तुरीयके ।

मानसारे[1] –

श्वेतं रक्तं तथा पीतं कृष्णवर्णं चतुर्विधम् ।

भूसुरादिचतुर्णां तु वर्णानां लिङ्गकं क्रमात् ।

अथवा कृष्णवर्णं तु सर्वजात्यर्हकं भवेत् ।

कालोत्तरे –

अभावात् कृष्णवर्णं तु सर्वजातिषु सिद्धिदम् ।

तत्रैव–

सर्वार्थसिद्धिदं कृष्णं चतुर्वर्णहितावहम् ।

सर्वेषामथवा श्वेतबाणलिङ्गं विमुक्तिदम् ।

सूक्ष्मे –

ब्राह्मणस्य तु वस्वश्रं क्षत्रियस्य षडश्रकम् ।

वैश्यस्य चतुरश्रं स्यात् शूद्रस्यैव तु वृत्तकम् ।

सर्वजातिषु कर्तव्यं पीठं वृत्तं विचक्षणः ।

विद्यासारसंहितायाम् –

---

[1] मानसारे] आ, उ ; ज्ञानसारे-अ; . . . . सारे- इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

रसलिङ्गं ब्राह्मणानां सर्वाभीष्टप्रदं भवेत् ।

रत्नलिङ्गं क्षत्रियाणां महाराज्यप्रदं भवेत् ।

स्वर्णलिङ्गं तु वैश्यानां महाधनपतिप्रदम् ।

शिलालिङ्गं तु शूद्राणां महदैश्वर्यदं[1] विदुः ।

स्फाटिकं बाणलिङ्गं च सर्वेषां सर्वकामदम् ।

स्त्रीणां तु पार्थिवं लिङ्गं सभर्तृणां विशेषतः ।

विधवानां निवृत्तानां रसलिङ्गाद्यनुक्रमम् ।

बाल्ये वा यौवने वाथ वार्धक्ये वाथ सुव्रताः ।

शुद्धस्फटिकलिङ्गं तु स्त्रीणां वै सद्यभोगदम् ।

अंशुमति –

विप्रक्षत्रियवैश्याश्च शूद्राश्चैव तु दीक्षिताः ।

आत्मार्थयजनं कुर्युर्न कुर्युस्तु परार्थकम् ।

चातुर्वर्णोद्भवस्त्रीणामर्चनं च विशेषतः ।

॥ इति शिवपूजाधिकारविधिः समाप्तः ॥

---

[1] महदैश्वर्यदं] अ, आ, उ ; बृहदैश्वर्यदं-इ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

शिवादिनिन्दादोषप्रतिपादकं वचनं सुप्रभेदे ज्ञानपादे -

देवद्रव्यापहारश्च शिवशास्त्रविदूषकः ।

पितृघातश्च ब्रह्मघ्ना एवमाद्यास्त्वनेकशः ।

यातनास्थानमाश्रित्य पतन्ति नरकार्णवे ।

उपदेशकाण्डे-

एताः षडपि शम्भ्वादीन् शिवस्थानान्यपि द्विजाः ।

वेदान् विभूतिरुद्राक्षमागमानपि शाङ्करान् ।

तथा शिवपुराणानि शिवसम्बन्धकान् परान् ।

विनिन्दयति मूढात्मा शिवद्रोही स ईरितः ।

विनिन्दकस्य निकटे वर्तनं श्रवणं तथा ।

वीक्षणं स्पर्शनं तस्य तेन सम्भाषणं तथा ।

तद्वाक्यश्रवणं तद्वत् शिवद्रोहः स ईरितः ।

ब्रह्माण्डादिसकलपुराणसारे विरूपाक्षमाहात्म्ये पूर्वभागे –

शिवशास्त्रं शिवाचारं शिवमन्त्रं शिवोच्चयम् ।

शिवलोकं शिवज्ञानं शिवध्यानं शिवार्चनम् ।

शिवशक्तिं[1] शिवस्तोत्रं शिवक्षेत्रं शिवागमम् ।

लघू कुर्वन्ति ये पापास्तान्निपीडयतानिशम् ।

शैवं पाशुपतं कालामुखं कापालधारिणम् ।

यदि हन्याज्जगत् सर्वं हतं तेन दुरात्मना ।

---

[1] शिवशक्तिं] अ, इ, उ; शिवभक्तिं-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

स्कान्दे काशीखण्डे विष्णुं प्रति शिववचनम् –

ममाश्रमरतांश्चान्ये ये निन्दन्ति नराधमाः ।

ब्राह्मणादिचतुर्वर्णान् शिवास्त्रकवचान्वितान् ।

पाषण्डास्ते सुरश्रेष्ठ भविष्यन्ति न संशयः ।

तेषां तप्तं हुतं जप्तं स्नानं ध्यानादिपूजनम् ।

भस्मनीव हुतं हव्यं सर्वं भवति निष्फलम् ।

ममाश्रमरतान् द्वेष्टि यः स मां द्वेष्टि माधव ।

ममाश्रमरतांस्तौति यः स मां स्तौति निर्मलम् ।

ये चान्यथा करिष्यन्ति त्वन्मायामूढचेतसः ।

तेषां नाहं न च त्वं च ब्रह्मेन्द्रार्कादिदेवताः ।

समर्थाः स्युः परित्राणे पतनान्नरकार्णवे[1]।

स्वच्छन्दे –

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येऽथवा प्रिये ।

सर्वे ते समधर्माणः शिवधामनि योजिताः ।

सर्वे जटाधराः प्रोक्ता भस्मोद्धूलितविग्रहाः ।

एकपङ्क्तिभुजः सर्वे त एव तु वरानने ।

मन्त्रमेतत् समादृत्य प्राग्जातिं न ह्युदीरयेत् ।

पुत्रकाणां साधकानां तथा समयिनामपि ।

प्राग्जात्युदीरणाद्देवि प्रायश्चित्ती नरो भवेत् ।

---

[1] पतनान्नरकार्णवे] सम्पादकीयः पाठः ; पातकान्नरकार्णवे-अ, आ, इ, उ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

दिनत्रयं तु रुद्रस्य पक्षाहं केशवस्य तु ।
पितामहस्य पक्षैकं नरके पच्यते तु सः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च परमेश्वरि ।
आचार्यत्वे नियुक्ताश्च ते सर्वे तु शिवास्थिताः[१] ।
अन्यथा प्राक्स्वरूपेण ये पश्यन्ति नराधमाः ।
नरके ते प्रपच्यन्ते सादाख्यं वत्सरत्रयम् ।

काशीखण्डे –

शिवनिन्दारतो मूढः शिवशास्त्रविनिन्दकः ।
तस्य नो निष्कृतिर्दृष्टा क्वचित्[२] शास्त्रेऽपि केनचित् ।

सूतसंहितायां च–

अस्ति चेद्ब्रह्मविज्ञानं स्त्रियो वा पुरुषस्य वा ।
वर्णाश्रमसमाचारास्तस्य नास्त्येव सर्वदा ।
अविज्ञायात्मविज्ञानं[३] स्वर्णाश्रममास्तिकाः[४] ।

---

[१] शिवास्थिताः] इ,उ ; शिवाः स्थिताः-अ; शिवस्थिताः-आ

[२] क्वचित्] अ, इ; क्वापि-आ,उ

[३] अअंविज्ञायात्मसद्भावं] मुद्रितः पाठः ; अविज्ञायात्मविज्ञानं-अ, इ,उ

[४] 'न विज्ञायात्मविज्ञानम् . . . स इति ' इत्यस्मिन् स्थाने 'आ' मातृकायामयं सार्धैकश्लोकः दृश्यते -
अविज्ञायात्मविज्ञानं सवध्यं नित्यमेव द्विजादिभिः ।
न तज्ज्ञानं न तद्ध्यानं न तच्छ्राद्धं न तत्तपः ।
विना तिर्यक्त्रिपुण्ड्राङ्कं विप्रेण यदनुष्ठितम् ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

जहाति यः स मूढात्मा पतत्येव न संशयः । इति ।

मनुस्मृतौ[१] –

त्रिपुण्ड्रं भस्मना धार्यं[२] नित्यमेव द्विजादिभिः ।

न तज्ज्ञानं न तद्ध्यानं . . . .

तत्सर्वं विफलं याति असद्दत्तं यथाऽफलम् । इति ।

वृद्धाचलमाहात्म्ये च –

स्नाने वा जपहोमयोर्व्रततिथौ देवार्चनादानयो-

र्दीक्षाश्राद्धकयोः कृतौ[३] स भसितो रुद्राक्षमालाधरः ।

कुर्यात् कर्म च वैदिकं च सकलं स्यादक्षयं तत्फलं

नो चेद्व्यर्थमिदं भवत्ययमहो पापोऽनवद्यो[४] भवेदिति ।

अंशुमति –

त्रिपुण्ड्रेण विना श्राद्धं त्रिपुण्ड्रेण विनाहुतिः ।

त्रिपुण्ड्रेण विना दानं राक्षसं तत् प्रकीर्तितम् । इति ।

---

[१] मनुस्मृतौ] अ, इ, उ; पदमिदं 'आ' मातृकायां न विद्यते ।

[२] त्रिपुण्ड्रं भस्मना धार्यं] अ, इ; अयं पादः 'आ' मातृकायां न विद्यते ।

[३] कृतौ] अ, इ, उ; क्रतो-आ

[४] पापोऽनवद्यो-अ, इ; पापोऽनवद्ये-आ

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC

अतः शिवागमप्रोक्तविशेषाचारतत्पराः ।
नराः श्रेयांसि भूयांसि विन्दन्तीति सुनिश्चितम् ।

॥ इति शालिवाटिपुरनिवासिज्ञानप्रकाशगुरुविरचितः
शिवागमादिमाहात्म्यसंग्रहः समाप्तः ॥

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MoE

Pujyasri Swami Dayananda Satabhishekam
Memorial Digital Library & Research Centre
Aim and Objective of the Library

Pujyasri Swami Dayananda Saraswati's wish to contribute to the protection of our ancient manuscripts will come to fruition with the inauguration of this digital library. It will give access to lakhs of manuscripts on various subjects in sanskrit language like Vedanta, Agama, Stotra, Kavyas, etc. Students, researchers and all interested people can comfortably read the digitized versions of these manuscripts. The advanced technology of this digital library allow researchers to magnify even a letter to a size which they can decipher easily. As of now, three researchers can simultaneously access the manuscripts. Sruti Seva Trust is also making sincere attempt in editing and publishing rare manuscripts and bringing re-print of some rare books.

We hope this digital library satisfies the educational and intellectual needs of thousands of researchers in the field of Sanskrit and its allied subjects. The ultimate goal of Pujya Sri Swamiji is to bring the culture and the tradition of our country together in one place.

We appeal to all individuals, Institutes, Libraries and other organizations to help us in procuring manuscripts and also in digitalisation of the same. We also appeal to philanthropists to fund this Himalayam project.

Please come! Let us join to make the vision of our Guru, Pujyasri Swami Dayananda Saraswathi, a reality. This is our great opportunity for samarpanam on His Satabhishekam.

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MC



SWAMI DAYANANDA SARASWATI

Quotable Quotes of
Swami Dayananda Saraswati

**Compassion is our nature,
as is sympathy,
and empathy is the key
that unlocks these emotions.**

Center for Shaiva Studies, Pondicherry Collection